# रेणुका - तन्त्रम्

प्रणेतारः

श्री स्वामिनः
सर्वतन्त्रस्वतन्त्राः निगमागमतन्त्रपरीणाः
परमहंसपरिव्राजकाचार्याः
श्री पीताम्बरापीठाधीश्वराः राष्ट्रगुरवः

प्रकाशकः
ताम्बरापीठ संस्कृत परिषद
खण्डेश्वर, दतिया (म. प्र.)

# रेणुका - तन्त्रम्

प्रणेतारः
**श्री स्वामिनः**
सर्वतन्त्रस्वतन्त्राः निगमागमतन्त्रपरीणाः
परमहंसपरिव्राजकाचार्याः
श्री पीताम्बरापीठाधीश्वराः राष्ट्रगुरवः

प्रकाशकः
**श्री पीताम्बरापीठ संस्कृत परिषद**
**बनखण्डेश्वर, दतिया (म. प्र.)**

# रेणुका-तन्त्रम्


प्रणेतारः

**श्री स्वामिनः**

सर्वतन्त्रस्वतन्त्राः निगमागमतन्त्रपरीणाः

परमहंसपरिव्राजकाचार्याः

श्री पीताम्बरापीठाधीश्वराः राष्ट्रगुरवः



प्रकाशकः

**श्री पीताम्बरापीठ संस्कृत परिषद**

बनखण्डेश्वर, दतिया (म. प्र.)

प्रकाशक :
श्री पीताम्बरा संस्कृत परिषद,
श्री पीताम्बरापीठ,
बनखण्डेश्वर; दतिया (म. प्र.)

प्रथम संस्करण : संवत् २०३४
१००० प्रतियाँ

मूल्य : ६–००

मुद्रक :
स्वाती एण्टरप्राइज
२०, ग्रेट नाग रोड
नागपुर–९

## प्रकाशकीय :

दशमहाविद्याओं में प्रसिद्ध तथा महात्माओं द्वारा सम्मानित श्री छिन्नमस्ता का ही रूपान्तर भगवती रेणुका हैं। भगवती छिन्ना दशों में मूर्धन्य एवं सर्वश्रेष्ठ हैं। योगियों की अन्तिम भूमिका अर्थात् चरमसिद्धि कपाल भेदन ही है। यह उसी सिद्धि की प्रतीक हैं। अतएव यह योग की अधिष्ठात्री हैं। रेणुका इसी की उपविद्या हैं। इनकी उपासना का प्रचलन दक्षिण भारत में अधिक है।

पुराणों के अनुसार महर्षि जमदग्नि के यजमानों ने श्री रेणुका के चरित्र पर लाञ्छन लगाया, फलतः परशुराम द्वारा शिरश्छेद हुआ। तदनन्तर उनकी ग्रीवा से निःसृत सतीत्व का पवित्र प्रकाश दृष्टिगोचर हुआ। यही तेज श्री रेणुका हैं।

भगवती के भक्तों द्वारा इनके सम्बन्ध में जो साहित्य उपलब्ध हुआ उसी का संकलन कर क्रमानुसार तन्त्र का रूप देकर प्रकाशित किया जा रहा है। उन सब आचार्यों के हम कृतज्ञ हैं जिनकी रचनाएं प्रकाशन में हैं।

प्रकाशन का व्ययभार सिरसा (प्रयाग) निवासी **श्रीहरि माधवशरण द्विवेदः** ने सहर्ष वहन किया है। "स्वाति एन्टरप्राइज" नागपुर के **श्री कैलाशनाथ शर्मा** की देखरेख में मुद्रित हुआ है। मुद्रणार्ह प्रतिलिपि श्री पं. ओं नारायण द्विवेदः ने की है। एतदर्थ सभी महानुभावों के प्रति आभार प्रदर्शन।

प्रस्तुत-प्रकाशन से साधक वर्ग लाभान्वित होगा और तन्त्र साहित्य की श्री वृद्धि होगी, ऐसी आशा है।

**वृजनन्दन शास्त्री** (साहित्याचार्य)
मंत्री
**श्री पीताम्बरा-पीठ संस्कृत परिषद्**
दतिया (म. प्र.)


वसन्तपञ्चमी
सं. २०३४

# श्री रेणुका - तन्त्रम्

*

## विषयानुक्रमणिका


| विषयः | | पृष्ठम् |
|---|---|---|
| १. डामरेश्वर तन्त्रे विषयानुक्रमणिका | ... | १ |
| २. रेणुका शबरी मन्त्र प्रयोगः | ... | ६ |
| ३. एक वीरा मन्त्रोद्धारः तत्प्रकाशश्च | ... | ९ |
| ४. रेणुका कवचम् त्रिसंख्यात्मकम् | ... | १२ |
| ५. रेणुका स्तवराज स्तोत्रम् | ... | २० |
| ६. रेणुका स्तोत्रं षष्ठसंख्यात्मकम् | ... | ३० |
| ७. रेणुका हृदयम् | ... | ४५ |
| ८. रेणुका सहस्रनाम स्तोत्रम् | ... | ४९ |
| ९. रेणुका अष्टोत्तरशतनाम स्तोत्रम् | ... | ६५ |
| १०. रेणुका खड्गमाला | ... | ६९ |
| ११. माला मन्त्र | ... | ७४ |
| १२. रेणुका गीतम् | ... | ७७ |
| १३. श्री परशुराम तन्त्रम् | ... | ८० |
| १३. परशुराम सहस्रनाम स्तोत्रम् | ... | ८४ |
| १५. श्री भार्गव कवचम् | ... | ९७ |
| १६. श्री रेणुकाजी की आरती | ... | १०४ |



परमहंस
श्री पीताम्बरापीठाधीश्वर राष्ट्रगुरु परमपूज्य
श्री १००८ श्री स्वामी जी महाराज, वनखण्डेश्वर, दतिया

# श्री रेणुका तन्त्रम्

**श्री शारदाम्बिकायै नमः**

**गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।**
**ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्देविभूतये ॥**

**ईश्वर उवाच**

श्रृणु देवि प्रवक्ष्यामि रेणुकामन्त्रमुत्तमम् ।
यस्य विज्ञानमात्रेण सर्वं कार्याणि साधयेत् ॥
अस्य रेणुका मन्त्रस्य भार्गवः ऋषिरुच्यते ।
छन्दोऽनुष्टुप् तथेत्युक्तो रेणुकादेवताह्वया ॥
क्लां बीजं क्लीं शक्तिः क्लूं कीलकमुदीरितम् ।
सर्वं कार्यार्थं सिद्धयर्थे विनियोगो वरानने ॥
क्लामित्यादि षडङ्गं स्यात् तस्य ध्यानमिहोच्यते ।
भूर्भुवः स्वरोमिति दिग्बन्धस्यैकरथो भवेत् ॥

ध्यानम्

**वामे शूलकपालयुग्ममितरे, खड्गं क्वणड्डिडिमं ।**
**विभ्राणाङ्कुर पङ्कजैस्त्रिनयनां नागादि भूषोज्वलाम् ॥**
**नाना कोटि युगान्त सूर्यसदृशां कल्पान्त कोपोज्वलां ।**
**दक्षालङ्कृत वाममुद्रितपदां श्री रेणुकामाश्रये ॥**

एवं ध्यात्वा योनिमुद्रांप्रदर्श्य पञ्चमुद्रया पञ्चोपचारपूजां कुर्यात् ।

या दैवात्वीरगर्भं स्यात् मृतापत्या च या भवेत् ।
सर्वत्र रेणुका मन्त्रं प्रयुञ्जीयात्सुतस्थितः ।।
पैशाचि भ्रमणिमूलं रक्तापामार्ग मूलकम् ।
एतद्वन्ध्यार्क यस्साध्यं बन्धयेद्गृह मुक्तये ।।
तद्गन्धघ्राणमात्रेण ब्रह्मरक्षोघणादयः ।
पलायन्ते महाभीत्या न समर्थापि हिंसितुम् ।।
नाना क्षुद्राणि नश्यन्ति दूरतस्तस्य दर्शनात् ।
अन्यथा सम्प्रवक्ष्यामि प्रयोगं सर्वं सिद्धये ।।
पत्रं सर्षप संयुक्तं लवणाज्जुहुयाद्यदि ।
सप्तरात्रं महादेवि ज्वरग्रस्तो भवेद्रिपुः ।।
क्षीरार्कं जुहुयाच्छत्रून् स्फोटकान् म्रियतेरिपुः ।
पत्रं सर्षप संयुक्तं क्षीरेणजुहुयाद्यदि ।।
अर्काग्निमासुरिं चैव कटुत्रय समन्वितम् ।
अर्कक्षीरेण लवणात् तैलोक्तं जुहुयाद्यदि ।
सप्ताहं म्रियते शत्रून् नात्र कार्या विचारणा ।।
कृष्णाश्व नखरोमाणि एकीकृत्य हुनेद्यदि ।
अष्टोत्तरं शतं देविसोऽपस्मारेण जायते ।।
घृतेन जुहुयाद्देवि अष्टोत्तरशतं तथा ।
अपस्मारादि शान्तस्यात् स्वस्थो भवति नान्यथा ।।
असूरि लवणं चैव अर्क दुग्ध समन्वितम् ।
अष्टोत्तरं समासीनो गवाग्रस्थो भवेद् ध्रुवम् ।।
ज्वरेण पीडिते शत्रून् घृते होमाद्विमुच्यते ।
असूरि निम्ब पत्राणि अष्टोत्तरशतं हुनेत् ।।
स्फोटका गृह्यते शत्रून् स्वस्था होम घृतेनवै ।
असूरि व्याघ्ररोमाणि एकीकृत्य हुनेद्यदि ।।
अपस्मारि भवेच्छत्रून् क्षीरेणैव प्रशाम्यति ।
असूरि पयसायुक्तं जुहुयात्तं निवर्त्तयेत् ।।

मार्जारस्य रोमाणि असूरि सहितेंन तु ।
अष्टोत्तरशतशत्रून् जपेत् पङ्गुः भविष्यति ॥
औदुम्बरार्क क्षीरेण होमं स्वस्थो भविष्यति ।
काकोलूकस्य पक्षाणि एकीकृत्य हुनेद्यदि ॥
विद्वेषणा भवेच्छिप्रं क्षीरेण स्वस्थमश्नुतें ॥

इति डामरेश्वर तन्त्रे
चतुः षष्ठितमोऽध्यायः ॥

# श्री रेणुका शबरी मन्त्र प्रयोग

अस्य रेणुका शबरी मन्त्रस्य भैरव ऋषिः पंक्तिश्छन्दः रेणुका शबरी देवता ममाभीष्ट सिध्यर्थे जपे विनियोगः ।

ॐ भैरव ऋषये नमः शिरसि पंक्ति छन्दसे नमो मुखे रेणुका शबरी देवतायै नमः हृदि विनियोगाय नमः सर्वाङ्गे । इति ऋष्यादि न्यासः । ॐ नमः अङ्गुष्ठाभ्यां नमः । श्रीं नमस्तर्जनीभ्यां नमः । ह्रीं नमो मध्यमाभ्यां नमः । क्रों नमः अनामिकाभ्यां नमः । ऐं नमः कनिष्ठिकाभ्यां नमः । ॐ श्रीं ह्रीं क्रों ऐं करतल करपृष्ठाभ्यां नमः इति करन्यासः ।

ॐ नमो हृदयाय नमः श्रीं नमः शिरसे स्वाहा ह्रीं नमः शिखायै वषट् क्रों नमः कवचाय हुं ऐं नमः नेत्रत्रयाय वौषट् । ॐ श्रीं ह्रीं क्रौं ऐं अस्त्राय फट् । इति हृदयादि षडङ्गन्यासः ।

हेमाद्रिसानावुद्याने नाना द्रुम मनोहरे ।
रत्न मण्डपमध्यस्थ वेदिकायां स्थितां स्मरेत् ।।
इति उद्यानं स्मृत्वा तत्र ध्यायेत् ।

**गुञ्जाफला कल्पित हाररम्यां श्रुत्योः शिखण्डं शिखिनो वहन्तीम् ।**
**कोदण्ड बाणौ दधतीं कराभ्यां कटिस्थवल्कां शबरीं स्मरामि ।।**

इति ध्यायेत् । ततः सर्वतो भद्रमण्डले आधार शक्त्यादि परतत्वान्त पीठदेवता संस्थाप्य ॐ आधार शक्त्यादि परतत्वान्त पीठदेवताभ्यो नमः । इति पीठदेवताः सम्पूज्य नव पीठशक्तीः पूजयेत् ।

तथा च पर्वादि क्रमेण ॐ जयायै नमः । ॐ विजयायै नमः । ॐ अजितायै नमः । ॐ अपराजितायै नमः । ॐ नित्यायै नमः ।

ॐ विलासिन्यै नमः। ॐ दोग्ध्र्यै नमः। ॐ अघोरायै नमः। मध्ये। ॐ मंगलायै नमः। इति पूजयेत्। ततः स्वर्णादि निर्मितं यन्त्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्युक्ष्य तदुपरि दुग्ध धारां जल धारां च दत्त्वा स्वच्छ वस्त्रेण प्रोच्छ्य। "ॐ सर्वबुद्धिप्रदे वर्णनीये सर्व सिद्धिप्रदे डाकिन्यै + ॐ रेणुका शबरी एह्येहि नमः" इति मन्त्रेण पुष्पाद्यासनं दत्त्वा पीठ मध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्ति प्रकल्प्य पाद्यादि पुष्पान्तैरुपचारैः सम्पूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात्। तद्यथा पुष्पाञ्जलिमादाय "ॐ सविन्मये परे देवि परामृत रसप्रिये। अनुज्ञां देहि मे मातः परिवारार्चनाय मे।" इति पठित्वा पुष्पाञ्जलिं च दत्त्वा देव्याज्ञां गृहीत्वा आवरण पूजां च कुर्यात्।

ततः षट्कोण केशरेषु आग्नेयादि चतुर्दिक्षु मध्ये दिक्षु च ॐ हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र। श्रीं शिरसे स्वाहा शिरः श्री पा. पू. त. न. ह्रीं शिखायै वषट् शिखा श्री पा. पू. त. न. क्रौं कवचाय हुं कवच श्री पा. पू. त. न. ऐं नेत्रत्रयायवौषट् नेत्रत्रय श्री पा. पू. त. न. ॐ श्रीं ह्रीं क्रौं ऐं अस्त्राय फट् अस्त्र श्री पा. पू. त. नमः। इति षडङ्गानि पूजयेत् ततः पुष्पाञ्जलिमादाय मूलमुच्चार्य। "ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।" इति पठित्वा पुष्पाञ्जलिं च दत्त्वा पूजितास्तर्पिता सन्तु इति वदेत्। इति प्रथमावरणम्।

ततोऽष्टदलेषु पूज्यपूजकयोरन्तरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण :—

ॐ हुंकार्यै नमः हुंकारी श्री पा० पू० त० नमः।

ॐ खेचर्यै नमः खेचरी श्री पा० पू० त० नमः।

ॐ चण्डास्यायै नमः चण्डास्या श्री पा० पू० त० नमः।

ॐ छेदिन्यै नमः छेदिनी श्री पा० पू० त० नमः।

ॐ क्षेपणायै नमः क्षेपणा श्री पा० पू० त० नमः ।
ॐ स्त्रियै नमः स्त्री श्री पा० पू० त० नमः ।
ॐ हुंकार्यै नमः हुंकारी श्री पा० पू० त० नमः ।
ॐ क्षेमकार्यै नमः क्षेमकारी श्री पा० पू० त० नमः ।
इत्यष्टौ शक्ती: संपूज्य पुष्पाञ्जलिं दद्यात् । इति द्वितीयावरणम् ।।

ततो भूपुरे पूर्वादि क्रमेण इन्द्रादि दश दिग्पालान् वज्राद्यायुधानि च पूजयेत् । इत्यावरण पूजां कृत्वा धूपादि नमस्कारान्तं सम्पूज्य जपं कुर्यात् । अस्य पुरश्चरणम् पंचलक्ष जपः । विल्वकाष्ठ दीपाग्नौ विल्वफलैर्दशांशतोहोमः । तत्तद्दशांशेन तर्पण, मार्जन, ब्राह्मण भोजनादि कुर्यात् । एवं कृते मन्त्रः सिद्धो भवति । सिद्धे मन्त्रे मन्त्री प्रयोगान् साधयेत् । तथा च, "ध्यात्वेव प्रजपेल्लक्षपञ्चकं तद्दशांशतः । फलैर्विल्वैः प्रजुहुयात् तत्काष्ठै रेधितेऽनले ।।" एवं सिद्धमनुं सम्यक् कृत्वा कर्माणि योजयेत् ।

मल्लीपुष्पैंर्जनावश्या इक्षुदण्डैर्धनाप्तयः ।
पचगव्यैर्धेनवः स्युरशोककुसुमैः सुताः ।।
इन्दीवरैः कृतेहोमे नृप पत्नी वशंवदा ।
अन्नाप्तिरन्नैः सकलं मधुकैर्वाञ्छितं भवेत् ।
प्रोदिता शाबरी विद्या कलौ त्वरितसिद्धिदा ।।

इति रेणुका शबरी पञ्चाक्षर मन्त्रः ।

प्रयोग :

रेणुका शबरी मन्त्रः पञ्चाक्षरी "ॐ श्रीं ह्रीं क्रौं ऐं ।"

# एक वीरा मन्त्रोद्धारः

वाङ्माया लक्ष्मिका मन्त्र त्रैलोक्य मोहिनी पदम् ।
ममाभीष्ट मनोरथञ्च शीघ्रं कुरु युग्मं वदेत् ॥
वह्निजायावधिः मन्त्रो पञ्चविंशति वर्णकः ।
ऋषि कौशिक विख्यातो छन्दोऽनुष्टुप्प्रकीर्त्तितः ॥
देवता या महादेवी एक वीराख्य सिद्धिदा ।
तूर्यस्वरमिदं बीजं शक्तिः स्याद्वह्नि वल्लभा ॥
कीलकं कामराजञ्च न्यसेत्तूर्यं षडङ्गकम् ।
ध्यानं कृत्वा ततो देव्याः जप्त्वामनुशतं भवेत् ॥

## अथ ध्यानम्

**मध्येबद्ध मयूरपिच्छनिवहां श्यामां प्रबालाधराम् ।**
**गुञ्जाहारधरां धनुःशरकरां नीलाम्बराडम्बराम् ॥**
**शृङ्गीवादनतत्परांसुनयनां मूर्द्धालकैर्बर्बराम् ।**
**भिल्लीवेशधरीं नमामि शबरीं त्वामेकबीरांपराम् ॥**

एकबीरा महादेव्याः सिद्धमन्त्र इति स्मृतः ।
भौमाष्टम्यां पुरश्चर्यामष्टोत्तर सहस्रकम् ॥
केवलं भौमवारे वा जप्त्वा सिद्धमनुर्भवेत् ।
तद्दशांश तिलाज्येन जुहुयात् हव्यवाहने ॥
तर्पणं मार्जनं तद्वत् ब्राह्मणानपि भोजयेत् ।
सिद्धविद्या महादेव्याः प्रजपेत्सर्वं सिद्धये ॥
गुप्तसारमिमं तन्त्रं शिवेन कथितं मनुः ॥

॥ इत्येकबीरा मन्त्रोद्धारः ॥

## अथ तत्प्रकाश:

अस्य श्री महादेव्या: एक बीराख्य मन्त्रस्य कौशिक विश्वामित्र ऋषि: अनुष्टुप् छन्द: श्रीमहादेवी एक बीरा देवता ईं बीजं स्वाहा शक्ति: क्लीं कीलकं ममेष्ट सिद्धयर्थे जपे विनियोग: । ईं बीजेन षडङ्ग: ।

### मन्त्र:

ऐं ह्रीं श्रीं क्लीं मेऽभीष्ट मनोरथं शीघ्रं कुरु कुरु स्वाहा । अन्यत् सर्वं पूर्ववत् । इति मन्त्र विधि: ।

## अथ एक बीरा यन्त्रम्

मुनि भूमि वसून् लिख्य रवि भूपाब्धयस्तथा ।
अङ्काग्नि ह्यब्धि षण्णागा: एवमङ्कान् क्रमाल्लिखेत् ।।
ईशाग्निवारुणे कोष्ठे पूर्वदक्षिण चोत्तरे ।
वायव्ये राक्षसे चाथ मध्य कोष्ठे लिखेत् क्रमात् ।।
ईशानाग्नेवायुरक्ष: कोणयोर्गुरुशिक्षया ।
यज्ञ वृक्षभवे पट्टे विस्तृते सुसमाहिते ।।
गैरिकद्रवतो लेख्यं गैरिकस्यैव खण्डत: ।
प्रथमे दिवसे व्योम पर्वताभिध संख्यया ।।
ततो दशोत्तरं बृद्धया लिखेद्दश दिनावधि ।
ब्रह्मचारी च मौनी च हविष्याशी सकृद्भुजि ।।
एकान्ते सम्यगालिख्य पूजयेच्चन्दनादिभि: ।
धूप: सर्जरसस्यास्य दीप: कार्यो घृतेन तु ।।
गैरिकाभ्यक्त सूत्रेण वर्त्तिकात्रप्रशस्यते ।
मिष्टान्नमेव नैवेद्यं शेषं पूजान्तरोदितम् ।।
विजयाबीजस्तु वक्रो लिखिते स्याज्जपेऽपि च ।
सम्पूज्यमन्त्रमेवंहि जपेन्मन्त्रमनन्यधी: ।।

लक्षं दश सहस्रं वा सहस्रं वा सशक्तितः ।
कार्यं गौरवतः कार्यं लाघवस्य वशादपि ॥
आधिक्यं तु फलाधिक्यं इतिशास्त्रेनिरूपितम् ।
स्वानुकुले स्वीयकार्यानुगुणे चापि तं जपेत् ॥
आरम्भं प्रथमं कुर्यात् गुरोराज्ञानुसारतः ।
एवं कृते सर्वकार्यं सिद्धिर्भवति नान्यथा ॥
जपेत्प्रत्याह्निके पूर्णे यन्त्राणां क्षालनं भवेत् ।
शुभस्थाने क्षालनस्य जलंतत्र क्षिपेत्सुधीः ॥
शूलेन पाहि नो देवि एकश्लोको जपत्विह ।
एवं दशदिनं कार्यं दशमे दिवसे बुधः ॥
समाप्य जपसंख्यां तां जुहुयात्सघृतैस्तिलैः ।
दशांशतः सर्वजपः संख्यातो दुग्धकैस्तथा ॥
तर्पणं मार्जनं कृत्वा ब्राह्मणानपिभोजयेत् ।
दशांशतो न्यूनताया ह्यावृत्तिर्भुजिकर्मणि ॥
हस्तार्के वाऽथ पुष्यार्के मूलार्के वा दिने शुभे ।
असाध्यान्यपि कर्माणि शीघ्रं सिध्यन्ति नान्यथा ॥
दृष्ट प्रत्यय एवाऽसौ प्रयोगोऽयं मया स्वयम् ॥
असाध्यादिषु कार्येषु स्यादावृत्तिर्दशावधि ।
नहीदं श्रूयते कश्चिद् इतोऽनाप्त मनोरथाः ॥
दशावृत्यापि लोकोऽपि कार्यं लाभाशयाऽबुध ।
दशावृत्ति करो दृष्टो मध्य एव फलोदयः ॥

॥ इति गुप्तसारे ब्रह्मयामले उत्तरार्द्धः ॥

# रेणुका कवचम्

**श्री देव्युवाच**

**जमदग्नि प्रियां देवीं रेणुकामेक मातरम् ।**
**सर्वारम्भे प्रसीद त्वं नमामि कुलदेवताम् ।।**
**अशक्तानां प्रकारो वै कथ्यतां मम शंकर ।**
**पुरश्चरण कालेषु का वा कार्या क्रियापरा ।।**

**श्री शंकरोवाच**

विना जपं विना दानं विना होमं महेश्वरि ।
रेणुका मन्त्रसिद्धिस्यान्नित्यं कवच पाठतः ।।
त्रैलोक्य विजयं नाम कवचं परमाद्भुतम् ।
सर्वसिद्धि करं लोके सर्वराज वशंकरम् ।।
डाकिनी भूतवेताल ब्रह्मराक्षस नाशनम् ।
पुरादेवासुरे युद्धे माहिषे लोक विग्रहे ।।
ब्रह्मणा निर्मिता रक्षा साधकानां सुखाय च ।
मन्त्रवीर्य समोपेतं भूतापस्मार नाशनम् ।।
देवैर्देवस्य विजये सिद्धैः खेचर सिद्धये ।
दिवा रात्रमधीतं स्यात् रेणुका कवचं प्रिये ।।
वने राजगृहे युद्धे ब्रह्मराक्षससंकुले ।
बन्धने गमने चैव कर्मणि राज संकटे ।।

कवचस्मरणादेव सर्वं कल्याणमश्नुते ।
रेणुकायाः महा देव्याः कवचं श्रृणु पार्वति ।
यस्य स्मरणमात्रेण धर्म कामार्थ भाजनम् ॥
रेणुका कवचस्यास्य ऋषिर्ब्रह्मा विधीयते ।
छन्दश्चित्राह्वयं प्रोक्तं देवता रेणुकास्मृता ॥
पृथ्वी बीजं रमा शक्तिः पुरुषार्थ चतुष्टयम् ।
विनियोगो महेशानि तदाकाले प्रकीर्त्तितः ॥
ध्यात्वा देवीं महामायां जगन्मातरमम्बिकाम् ।
पूर्णकुम्भ समायुक्तां मुक्ताहारविराजिताम् ॥
स्वर्णालङ्कार संयुक्तां स्वर्ण सिंहासनंस्थितां ।
मस्तके गुरुपादाब्जं प्रणम्यकवचं पठेत् ॥
इन्द्रो मां रक्षतु प्राच्यां वह्नौ वह्निः सुरेश्वरि ।
याम्यां यमः सदा पातुनैर्ऋत्यां निर्ऋतिस्तथा ॥
पश्चिमे वरुणः पातु वायव्ये वायु देवता ।
धनदश्चोत्तरे पातु ईशान्यामीश्वरो विभुः ॥
ऊर्ध्वं ब्रह्मा सदा पातु अनन्तोऽधः सदावतु ।
पञ्चान्तको महेन्द्रश्च वामकर्णेन्दु भूषितः ॥
प्रणवं पुटितं कृत्वा तत्कृत्वा प्रणवं पुनः ।
समुच्चार्य ततो देवी कवचं प्रपठे तथा ॥
ब्रह्माणी मे शिरः पातु नेत्रे पातु महेश्वरि ।
वैष्णवी नासिका युग्मं कर्णयोः कर्णवासिनी ॥
कण्ठं पातु महालक्ष्मीर्हृदयं चण्ड भैरवी ।
वाहू मे बगला पातु करौ महिष मर्दिनी ॥
कराङ्गुलिषु केशेषु नाभि मे चर्चिकावतु ।
गुह्यं गुह्येश्वरी पातु ऊरूपातु महामतिः ॥
जानुनी जननी रामा गुल्फयोर्नारसिंहिका ।
वसुन्धरा सदा पादौ पायात्पादाङ्गुलीषु च ॥

रोमकूपे मेद मज्जा रक्त मांसास्थिखण्डके ।
रेणुका जननी पातु महापुर निवासिनी ।
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।।
पूर्वं बीजं समुच्चार्यं सम्पुटक्रमयोगतः ।
मुद्रां वध्वा महेशानि गोलं न्यासं समाचरेत् ।।

अस्य श्री रेणुका कवचमन्त्रस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः रेणुका देवता लं बीजं रेणुका प्रीत्यर्थे गोलन्यासे विनियोगः ।

ॐ रां अङ्गुष्ठाभ्यां नमः ।
ॐ रीं तर्जनीभ्यां नमः ।
ॐ रूँ मध्यमाभ्यां नमः ।
ॐ रैं अनामिकाभ्यां नमः ।
ॐ रौं कनिष्ठिकाभ्यां नमः ।
ॐ रः करतलकर पृष्ठाभ्यां नमः ।

एवं हृदयादिन्यासः ।

ॐ पं नमः मूर्ध्नि ।
ॐ फं नमः दक्षिण नेत्रे ।
ॐ बं नमः वाम नेत्रे ।
ॐ भं नमः दक्षिण नासापुटे ।
ॐ मं नमः वाम नासापुटे ।
ॐ यं नमः दक्षिण कर्णे ।
ॐ रं नमः वाम कर्णे ।
ॐ लं नमः मुखे ।
ॐ वं नमः गुदे ।

ब्रह्माणी ब्रह्मभागे च शिरो धरणि धारणी ।
रक्ष रक्ष महेशानि सदा मां पाहि पार्वती ।।
भैरवी त्रिपुरा बाला वज्रं मे तारिणी परा ।
रक्ष-रक्ष महेशानि सदा मां पाहि पार्वती ।।

एषा मेऽङ्गं सदा पातु पार्वती हरवल्लभा।
महिषासुर संहर्त्री विधातृ वर दायिनि ।।
मस्तके पातु मे नित्यं महाकाली प्रसीदतु।
आकाशे ताडका पातु पाताले वह्निवासिनी ।।
वाम दक्षिणयोश्चापि कालिका च करालिका।
धनुर्बाण धरा चैव खड्ग खट्वांग धारिणी।
सर्वाङ्गं मे सदा पातु रेणुका वरदायिनि ।।
रां रां रां रेणुके मातर्भार्गवोद्धार कारिणि।
राजराज कुलोद्भूते संग्रामे शत्रु संकटे ।।
जलाप्लाव्ये व्याघ्रभये तथा राज भयेऽपि च।
श्मशाने संकटे घोरे पाहि मां परमेश्वरि ।।
रूपं देहि यशो देहि द्विषतां नाशमेव च।
प्रसादः स्याच्छुभो मातर्वरदा रेणुके भव ।।

**ऐं महेशि महेश्वरि चण्डिके,**
**भुजगधारिणि शंख कपालिके।**
**कनक कुण्डल मण्डल भाजने,**
**वपुरिदञ्च पुनीहि महेश्वरि ।।**

इदं श्री कवचं देव्याः रेणुकाया महेश्वरि।
त्रिकालं यः पठेन्नित्यं तस्य सिद्धिः प्रजायते ।।
ग्रहणेऽर्कस्य चन्द्रस्य शुचिः पूर्वमुपोषितः।
शतत्रयावृत्ति पाठात् मन्त्र सिद्धिः प्रजायते ।।
नदी संगममासाद्य नाभिमात्रोदकस्थितः।
रवि मण्डलमुद्वीक्ष्य जले तत्र स्थितां शिवाम् ।।
बिचिन्त्य मण्डले देवीं कार्यसिद्धिर्भवेद्ध्रुवम्।
घटं तत्र प्रतिष्ठाप्य विभूतिं तत्र वेशयेत्।
दीपं सर्षप तैलेन कवचं त्रिः पठेत्तदा ।।
भूत प्रेत पिशाचाश्च डाकिन्यो यातुधानिका।
सर्वे ते नाशमायान्ति कवचस्मरणात्प्रिये ।।

धनं धान्यं यशो मेधां यत्किचिन्मनसेप्सितम् ।
कवच स्मरणादेव सर्वमाप्नोति नित्यशः ॥

॥ इति श्री मातृ संस्थाने भैरव रुद्रयामले रेणुका कल्पे पञ्चमं पटलं सम्पूर्णम् ॥

## रेणुका कवचम्

श्रृणुदेवि प्रवक्ष्यामि रेणुका कवचं परम् ।
येन विज्ञान मात्रेण सान्निध्यं रेणुका भवेत् ॥
रेणुका कवचस्यास्य भार्गवस्तु ऋषिस्मृतः ।
छन्दोऽनुष्टुप् तथा देवि रेणुका देवता मम ॥
इष्ट काम्यार्थं सिध्यर्थे विनियोगो वरानने ।
रेणुका मे शिरः पातु परा शक्तिस्वरूपिणी ॥
भालं रक्षतु भुवनेशी लोचनं मे त्रिलोचनी ।
मुखं मे रेणुका पातु नासिकां काल नाशिनी ॥
भ्रुवौ सुभ्रूलता पातु दन्तान्मे कुन्ददन्तिका ।
ओष्ठं बिम्बोष्ठिका पातु जिह्वां पातु सुरेश्वरी ॥
ग्रीवां रक्षतु इन्द्राणी कुक्षौ रक्षेत्कुलेश्वरी ।
गण्डं मे पातु चामुण्डा महालक्ष्मीस्तु कन्धरम् ॥
अंसौ हंसप्रिया पातु बाहू सायुधवाहुका ।
वाणी वक्षस्थलं पातु हृदयं हृदयेश्वरी ॥
जघने घनवाहा मे गुह्यं गुह्येश्वरी मम ।
ऊरू वरोरुका पातु श्री देवी सिद्धिदेवता ॥
सर्वाङ्गं सर्वदा पातु सर्वाणी रूपिणी वरा ।
इति श्री रेणुका वर्म दुष्कर्म त्रासनं सदा ॥
स्तुति मात्रेण भक्तानां संरक्षणविचक्षणम् ।
जप्त्वा तु कवचं देव्याः यत्र यत्र तु गच्छति ॥
तत्र तत्र जयो लाभः कार्य सिद्धिश्च जायते ।

॥ इति डामरेश्वर तन्त्रे रेणुका कवचं नाम षष्ठितमोऽध्यायः ॥

# रेणुका कवचम्

## श्रीदेव्युवाच

**भगवन् ब्रूहि कवचं भुक्ति मुक्ति प्रदायकम् ।**
**त्रैलोक्य मोहनं नाम कृपया मे जगद्गुरो ॥**

## ईश्वरोवाच

श्रृणुदेवि वरारोहे कवचं ब्रह्मरूपिणि ।
ब्रह्मेश प्रमुखाधीश नारायण मुखाच्युतम् ॥
कवचं रेणुका देव्या: य: पठेत्प्रयतो नर: ।
तच्छ्रुत्वा पठनात्ब्रह्मा सृष्टि कर्त्ता भवत्प्रभु: ॥
कृष्णो दूर्वादलश्यामो देवकी गर्भ संभव: ।
हृत्पद्मे रेणुकां ध्यात्वा ऋद्धि सिद्धि फलप्रदां ॥
सर्व श्यामा भवन्त्येता: जनार्दन विभूतय: ।
एवं देवगणा: सर्वे सर्वैश्वर्यमवाप्नुयु: ॥
शिष्याय गुरुभक्ताय साधकाय प्रकाशयेत् ।
यो ददात्यन्य शिष्याय शठाय पशुरूपिणे ॥
पञ्चत्वं जायते तस्य ह्यथवा वातुलो भवेत् ।
कवचस्यास्य सुभगे योगी रुद्रऋषि: स्वयम् ॥
विराट् छन्दो निगदितं देवता रेणुका परा ।
धर्मार्थकाम मोक्षेषु विनियोग उदाहृत: ॥
क्लीं क्लीं क्लीं मे शिर: पातुभालं नेत्रयुगं तथा ।
रेणुका नेत्र युगलं क्लीं क्लीं नासापुटद्वयम् ॥

रां माता च मे पातु सजिह्वां मुखमेव च ।
भुजयुग्मं तथा पातु क्लीं क्लीं मे त्र्यक्षरात्मिका ।।

कण्ठं च चिबुकं चैव रक्षेन्मे जगदम्बिका ।
स्वाहावतु ब्रह्मरन्ध्रं महापुर निवासिनी ।।

क्लीं क्लीं मे रेणुका पश्चात् रक्षेन्मे पादमेव च ।
क्लीं क्लीं मे हृदयं पातु क्लीं क्लीं मे पार्श्वमेव च ।।

क्लीं क्लीं मे नाभि कमलं क्लीं क्लीं मे पृष्ठमेव च ।
क्लीं क्लीं मे द्विफडन्ते च स्वाहेति परिकीर्तिता ।।

एकाक्षरी महाविद्या सर्वाङ्गं मे सदावतु ।
प्राच्यां रक्षतु मां देवि आग्नेय्यां मातृका तथा ।।

रेणुका दक्षिणे रक्षेद्राममाता च नैर्ऋते ।
विरोधिनी प्रतीच्यां मे वायव्यां जगदम्बिका ।।

उग्रा रक्षेदुदीच्यां च ईशान्यां मां प्रभावती ।
दीप्ता रक्षेत्त्वधो भागे नीला चैवोर्ध्वदेशिके ।।

पुत्रमित्रकलत्रादीन् देवी रक्षतु सर्वदा ।
इति ते कथितं देवि सर्वमन्मोघविग्रहम् ।।

त्रैलोक्य मोहनं नाम कवचं ब्रह्मरूपिणी ।
ब्रह्मेश प्रमुखाधीश नारायण मुखाच्युतम् ।।

कवचं रेणुका देव्याः यः पठेत्प्रयतो नरः ।
स सर्वं सिद्धिमाप्नोति सत्यमेव न संशयः ।।

गाने तु तुम्बरुः साक्षाद्दाने वै वासवो यथा ।
दत्तात्रेय समो ज्ञाने गंगेव मलनाशकः ।।

कामदेव समो रूपे वायु तुल्यः पराक्रमे ।
स भवेत्साधकः श्रेष्ठः सत्यं सत्यं मयोदितम् ।।

न हन्यते गतिस्तस्य वायोरिव नभस्तले ।
शतमष्टोत्तरं चास्य पुरश्चर्याविधिस्मृतः ।।

हवनं तद्दशांशेन कृत्वा तत्साधयेद्ध्रुवम् ।
यदि चेत् सिद्ध कवचः शिवतुल्यो भवेत्स्वयम् ॥
पठनाद्धारणात्सर्वा पृथ्वी काशीपुरी समा ।
यत्र कुत्र विपन्नोऽपि वाराणस्यां मृतो भवेत् ॥
न मन्त्रो नौषधं तस्य नाकाल मरणं तथा ।
भवत्येव महेशानि कवचे हृदिसंस्थिते ॥
अश्वमेध सहस्राणि वाजपेय शतानि च ।
महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा ॥
कलां नार्हन्ति तान्येव सकृदुच्चारणादतः ।
पुष्पाञ्जलिं रेणुकायै मूलेनैव सदार्पयेत् ॥
शतवर्ष सहस्रायाः पूजायाः फलमाप्नुयात् ।
लिखित्वा भूर्जपत्रे तु वध्नीयात्सर्व कार्यके ॥
इदं कवचमज्ञात्वा यो जपेत् रेणुकां शिवाम् ।
शतलक्षं प्रजप्त्वोऽपि न मन्त्रः सिद्धिदायकः ॥

**इति श्री डामरेश्वर तन्त्रे ईश्वर पार्वती संवादे रेणुका कवचं समाप्तम् ॥**

# श्री रेणुका स्तवराज स्तोत्रम्

## श्री कौलार्णवे भैरवोक्तम्

**सदाशिवं नमस्कृत्य उमां दुर्गां गणेश्वरम् ।**
**वक्ष्यामि रेणुकास्तोत्रं भुक्ति मुक्ति फलप्रदम् ।।**

गुप्तप्रकट सिद्धानां योगिनी चक्र पादुकाम् ।
नमामि शिरसा नाथं कुल कौलेश्वरं प्रभुम् ।।
आनन्द पीठ मध्यस्थं आनन्द परवेष्टितम् ।
प्रणम्य च कुलानन्दं ज्ञानानन्द प्रकाशकम् ।।
अक्षरं क्षरमाद्यन्तं प्रकृतिं पुरुषं परम् ।
तं बन्दे सच्चिदानन्दं एकबीरं सशाम्भवम् ।।
सिंह पर्वतमासीनं देव देवेश्वरोत्तमम् ।
तत्रस्थञ्च सुखासीनमात्रेयं ब्रह्मवादिनम् ।।
अनुसूया वरं प्राप्तं पुत्रस्नेहेन वत्सलाम् ।
यत्रयोगीश्वरो विष्णु संभविष्यत्ययोनिजाम् ।।
नाना भोग समाकीर्णं क्रीडते प्रमदादिभिः ।
मदिरानन्द चैतन्यं ज्ञानानन्द प्रबोधकम् ।।
जमदग्नेस्तु या भार्या रेणुका नाम विश्रुता ।
राम मातेति विख्याता त्रिषु लोकेषु विस्तृता ।।
दत्तात्रेयो महात्माऽसौ नागपिंगल पूर्वकम् ।
रेणुकायाः विनिक्षिप्तं सद्भावं बीजमुत्तमम् ।।
माया बीजेन संयुक्तं महापीठोद्भवं शुभम् ।
तत्रस्था शाम्भवी शक्तिः सोमया च कुलान्वया ।।

कुलाकुल विभागेन वाम दक्षिण संज्ञकम् ।
सन्तानं त्रिः प्रकारं चतुः सिंहासने सदा ॥

क्रम पीठैः सदा युक्तं द्वीप द्वीपान्तरे स्थितम् ।
पञ्चाशद्वर्ण भेदेन मन्त्रयन्त्राणि वै स्थितम् ॥

चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चकंत्रिकम् ।
वषट्कारः समुत्पन्नः कौमार्या वटुकादयः ॥

षड्भिः चक्रैस्तु वै देव्याः श्रीकण्ठाद्याश्चैव भैरवाः ।
श्रिया क्रमेण संयुक्ता चतुःषष्ठ्यास्तु देवताः ॥

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा च शिवोद्भवा ॥

प्रयोगे वारुणं कौलं आदावाद्य जयन्तिका ।
चरत्रिकं प्रतञ्चैव देवी कोष्ठेन चाष्टधा ॥

माहेन्द्री च तथाग्नेयी याम्यां नैऋत्य वारुणी ।
वायव्यां हि च कौवेरी ईशान्यां दिव्ययोगिनी ॥

उड्यायनी जलन्धरी कामरूपा च या स्थिता ।
कौलार्णवे स्थिता या च मन्त्रे चक्रे तु या स्थिता ॥

प्रसन्ना प्रकटा चैव सहजा कुलजादयः ।
क्षेत्रपालाश्च दिक्पाला वेतालाश्चैव राक्षसाः ॥

पिशाचा गण गन्धर्वा शाकिनी डाकिनी तथा ।
खेचरा भूचराश्चैव पातालाश्चान्तरिक्षगा ॥

नाना रूप धरा सर्वे बलिपूजाभिकांक्षिणः ।
अधिकारस्वरूपेण विचरन्ति महीतले ॥

क्रीडते योगिनी बृन्दं क्षेत्र मातृ गृहे स्थितम् ।
केचिद् गायन्ति नृत्यन्ति पूजयन्ति स्तुवन्ति च ॥

हसन्ति किलकिलायन्ति गर्जयन्ति महाबलाः ।
मातृ पादोद्भवा सर्वे मातृ मण्डल संस्थिता ॥

तन्मध्ये शाम्भवी शक्तिर्रेणुका सुरपूजिता ।
श्रावण्यश्चैव शाक्तेयं अटव्या शाम्भवी पदम् ।।

तेन सा शाम्भवी प्रोक्ता हकाराद्धिकलास्मृता ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च ।।

माला बीज समुत्पन्ना सा शक्तिर्रेणुका मता ।
नमोऽस्तु ते महादेवि महामाये नमोऽस्तुते ।।

नमोऽस्तु ते वीरभद्रे वीरमात्रे नमोऽस्तुते ।
राममात्रे नमस्तुभ्यं त्रिषु लोकेषु पूजिता ।।

नमोऽस्तु कुलकौलेशि नमोऽस्तु ज्ञान भैरवि ।
नमोऽस्तु ज्ञानगे सर्वे सर्वेश्वरि नमोऽस्तुते ।।

रामेश्वरि नमस्तुभ्यं कामेश्वरि नमोऽस्तुते ।
भद्रकालि नमस्तुभ्यं कामेश्वरि नमोऽस्तुते ।।

जमदग्नि प्रिये शुभ्रे रेणुके त्वां नमोऽस्तुते ।
चैतन्य विग्रहे नित्ये व्यापके त्वां नमोऽस्तुते ।।

त्रैलोक्य व्यापिनी देवी विष्णुमाये नमोऽस्तुते ।
शंकर प्रेमपात्रत्वं पार्वति त्वां नमोऽस्तुते ।।

हरकायार्द्धवासित्वं शंकरि त्वां नमोऽस्तुते ।
भक्तिप्रिये महाशुभ्रे मालिनि त्वां नमोऽस्तुते ।।

पञ्चमुद्रे महामुद्रे भूतपञ्चक मुद्रिते ।
महामुद्रात्मिके शान्ते रेणुकायै नमोऽस्तुते ।।

सद्भावबीजमुत्पन्नं भावेन तव संस्थितम् ।
स्वात्मभावात्मजात्मस्था रेणुकायै नमोऽस्तुते ।।

स्वच्छन्द विहारिणी शक्तिः स्वच्छन्देन च संस्थिता ।
स्वच्छन्दोन्मत्तमातङ्गी रेणुकायै नमोऽस्तुते ।।

प्रमत्ते मदिरानन्दे मदिरानन्द विग्रहे ।
चिद्रूपे परमानन्दे रेणुकायै नमोऽस्तुते ।।

जगद्बीजे जगद्रूपे जगद्भूते जगन्मये ।
जगन्माते जगन्मातः रेणुकायै नमोऽस्तुते ॥

वैष्णवी विष्णुमाया त्वं मोहितं सचराचरम् ।
वाञ्छितार्थप्रदादेवि तां वन्दे रेणुकामहम् ॥

स्वच्छन्द भैरवीचण्डे मातङ्गी मत्त रूपिणी ।
योगिनीवृन्द मध्यस्थे एक बीरे नमोऽस्तुते ॥

ब्रह्म वैकुण्ठ रुद्राद्या मुनीन्द्राः सिद्धकिन्नराः ।
त्वत्पदं पूजयन्तीह मातृपीठे नमोऽस्तुते ॥

त्वं परा त्वं च पश्यन्ती मध्यमा त्वं च वैखरी ।
ऋग्यजुः सामाथर्वाणी शब्द ब्रह्मात्मिके नमः ॥

यज्ञ विद्या त्रिसन्ध्या त्वं वेद गर्भा सुरेश्वरि ।
गंगा गया च गायत्री माता पुर निवासिनी ॥

त्वं स्वाहा त्वं स्वधा चैव पञ्चयज्ञ महामखे ।
यस्य जाति द्विजेन्द्राणां मातृ लिङ्ग महेश्वरि ॥

त्वं च काली महाकाली महा लक्ष्मी सरस्वती ।
त्रिपुरा त्वरिता त्वं च रेणुकायै नमोऽस्तुते ॥

कपालिनी कालिकात्वं भैरवी त्वं च अम्बिका ।
माहेन्द्री त्वं विशालाक्षी रेणुकायै नमोऽस्तुते ॥

क्षेत्रजा पीठजा त्वं च मन्त्रजा त्वं कलाम्बिके ।
प्रसन्ना प्रकटा त्वं च सहजा त्वं च रेणुके ॥

वामे ज्येष्ठे च रौद्रे च मालिनी मन्त्र योगिनी ।
वेद सिद्धान्तयानित्यं तां वन्दे रेणुकामहम् ॥

सुरज्येष्ठे सुरानन्दे सर्व देवमयी शिवे ।
सच्चिदानन्द चिद्रूपे विश्वेश्वरि नमोऽस्तुते ॥

कपाल मालिनीकाली महाकाली कपालिनी ।
उग्र चण्डा प्रचण्डा त्वं रेणुकायै नमोऽस्तुते ॥

पीठक्षेत्रे श्मशाने च क्रीडते बृन्द भैरवी।
चत्वारि योगिनी बृन्दे रेणुकायै नमोऽस्तुते ॥

चतुःषष्ठिस्तु योगिन्याः सिद्ध संघट्ट मेलके।
मातृ मण्डल मध्यस्थे रेणुकायै नमोऽस्तुते ॥

मन्त्र यन्त्र कुलाद्ये तु कुल कौलेश्वरि शिवे।
ज्ञानानन्द सुरापूर्णे रेणुकायै नमोऽस्तुते ॥

चतुरष्टक पीठात्वं माया सा चण्डिका मता।
बिन्दु नाद कला ज्योतिः शिवशक्तिः सुशाम्भवी ॥

पञ्चबीज समायुक्ता पञ्चप्रवण संभवा।
उकार विग्रहा शक्तिः समया चञ्चलाम्बिका ॥

कौलान्वय समुद्भूते कौलिकान्वय पूजिते।
भारती चैक बीरा त्वं कुल कौलान्तरालनी ॥

राजराजेश्वरी त्वं च सिंहे चण्डेश्वरी मते।
स्वच्छन्द श्रीभवा प्रोक्ता सा शक्तिर्मातृमण्डले ॥

आदि सूत्रक्रमैर्युक्तं मध्य सूत्रं तथैव च।
संवर्त्त मण्डलान्तस्थे वीरमात्रे नमोऽस्तु ते ॥

कुलावलिमथा दृक्षा अम्बा श्रीनाथपादुका।
अकृष्ट केतकि त्वं च कुब्जे चण्डि नमोऽस्तुते ॥

दूती बटुक कौमार्या भैरवी क्षेत्र पालका।
सिद्ध संघट्टयोगिन्यां क्रीडते मातृमण्डले ॥

योगिनी पीठ मध्यस्थं महापीठं सशाम्भवम्।
एक वीराक्षरं ब्रह्म सुर सिद्धालयं परम् ॥

हंस पर्यङ्कमारूढं त्रिकोणं बीज पूरकम्।
एकबीरामिदं बीजं वाग्भवं परमेश्वरम् ॥

त्रिबीजं बाण संयुक्तं त्रिषट् कोष्ठ दले स्थितम्।
तन्मध्ये शाम्भवी बीजं एकबीरं चिदात्मकम् ॥

त्रिकोणान्येक बीजञ्च मायाबीजेन वेष्टितम् ।
आनन्दकन्द कल्लोलं हसन्तं मातृमण्डलम् ॥
ब्रह्मा विष्णुर्महादेव इन्द्राद्याश्चैव देवता ।
यद्बीजं मातृपीठस्थं शाम्भवं तं नमाम्यहम् ॥
अकारस्याष्टमं बीजं शिवशक्ति समन्वितम् ।
तन्मध्ये वस्तु निष्क्रान्तं एकबीरं सशाम्भवम् ॥
हृदि मध्येस्थितं पद्मं हृदि पद्मं सकर्णकम् ।
तन्मध्ये वस्तु निष्क्रान्तं एकबीरं सशाम्भवम् ॥
सर्वनारीशुभत्वञ्च कूटस्थं बीजमव्ययम् ।
हकारार्ध कुलाधारमेकबीरे नमोऽस्तु ते ॥
नित्यक्लिन्ने मदद्रावे प्राणजीवात्म संज्ञके ।
हृल्लेखे सच्चिदानन्दे विश्वेश्वरि नमोऽस्तुते ॥
कुल पङ्कज मार्तण्डे हंसाक्षे प्राणधारिणी ।
चैतन्य विग्रहे नित्ये रेणुकायै नमोऽस्तुते ॥
कदम्ब गोलकाकारे ब्रह्मरन्ध्र विलम्बिनी ।
सूक्ष्मसूक्ष्मान्तरे नित्ये रेणुकायै नमोऽस्तुते ॥
केन्दुः स्रवलिता शक्तिः षट्चक्र क्रमभेदिनी ।
ब्रह्म रन्ध्रे विनिष्क्रान्ते रेणुकाव्योम मण्डले ॥
लिङ्गत्रयान्ते निष्क्रान्ते शून्ये नाद विनिग्रहे ।
निरालम्बे निराभासे रेणुकायै नमोऽस्तुते ॥
नाभि मूलेषु या शक्तिः कुण्डिल्याः सर्परूपिणी ।
षट्चक्रविन्दुनादान्ते रेणुका व्योम मण्डले ॥
इडा पिंगल मध्यस्थे ब्रह्म मार्ग प्रवाहिनी ।
मृणाल तन्तु रूपेण हिमांशु नित्यं चिदाम्बिके ॥
द्वासप्तति सहस्राणि नाड़ी बृन्दानि चालयेत् ।
सोम सूर्याग्नि भिन्नेऽसि चिद्रूपे परमामृते ॥

शशिकोटि समाभासे अवसीः ब्रह्ममण्डले ।
अचले सर्वभूतस्थे चैतन्य शाश्वती ध्रुवे ।।
त्रिदण्डे चालयन्तीं त्वां भूतपञ्चक मालिनी ।
अचले सर्वभूतस्थे राममात्रे नमोऽस्तुते ।।
अन्तःकरण सम्बन्धि नाडीयन्त्र प्रवाहिनी ।
प्रणवात्मक हः सम्यक् हृत्प्रष्ठे प्रति तिष्ठति ।।
आधारे नाभि मध्यस्थे हृत्पद्म कण्ठ तालुके ।
प्राणस्यान्तर्गते सूक्ष्मे षोडश चैव रेणुके ।।
स्थानत्रय विनिष्क्रान्ते मात्रात्रय विनिष्ठिते ।
मातृकेत्येक वीरे च व्योमातीते परात्परे ।।
पीठस्थे पीठमध्यस्थे मायातीते परात्परे ।
हंकारार्ध कलापूर्णे रेणुकायै नमोऽस्तुते ।।
त्वया बिनैक भेदेन व्यापितं सचराचरम् ।
इच्छा ज्ञान क्रिया शक्ति रेणुकायै नमोऽस्तुते ।
गिरि मध्ये तथारण्ये मेरु मध्ये हिमाचले ।।
नन्दा कात्यायिनी दुर्गे रेणुकायै नमोऽस्तुते ।
स्वर्ग पाताल मर्त्येषु विचरन्ती त्वनेकधा ।।
प्रचण्ड योगिनी चण्डे एक वीरे नमोऽस्तुते ।
तेजो मण्डल दुर्धर्षे सूर्यकोटि समप्रभे ।।
दुर्निरीक्ष्ये दुराधारे एकवीरे नमोऽतुस्ते ।
किरीटिनि महाशुभ्रे रत्नोज्वलित कुण्डले ।।
हारकेयूर शोभाढ्ये एकवीरे नमोऽस्तुते ।
ऐं बीजं व्यापितं येन वज्रेयं सचराचरम् ।।
त्रैलोक्यं क्षोभयन्तीं त्वां माया बीजेन रेणुकाम् ।
त्वमेव परमं जाप्यं त्वमेव परमं तपः ।।
त्वमेव परमं ज्ञानं रेणुकायै नमोऽस्तुते ।
त्वं माता त्वं पिता भ्राता त्वं सखा त्वं गुरु प्रभुः ।।

त्वमेव जगतां धात्री त्राहि मां भक्त वत्सले ।
अधर्मः कुरु ते धर्मं धनवान् धनमीश्वरि ।।
अजातिः कुरुते जातिं त्वयाज्ञा परमेश्वरि ।
अपवित्रं पवित्रेयं कुरुषे त्वं सदाम्बिके ।।
त्वमेव परमं तीर्थं त्रैमूर्तिस्त्वं जगन्मये ।
जातिभ्रष्टा कुलभ्रष्टा व्रतभ्रष्टा च ये नराः ।।
एक वीरा प्रसादेन शुद्धास्ते नात्र संशयः ।
द्विजाति म्लेक्ष पर्यन्तं पापं यः कुरुते नरः ।।
तत्सर्वं दह्यतें क्षिप्रं रेणुका दर्शनेन तु ।
वर्णा वर्णौ न तस्यास्ति त्वन्मार्गे ये यथेरितम् ।।
तीर्थ भूतासि मातङ्गि रेणुकायै नमोऽस्तुते ।
विरजे रजनीमूर्ते निर्धूतेधूत कल्मषे ।।
त्रैलोक्य पावनि पुण्ये एकवीरे नमोऽस्तुते ।
समनो घ्राणांघ्रि पाणिश्च दद्रुस्फोटकमेव च ।।
दारिद्रय दुःख रोगघ्नीं तां वन्दे रेणुकामहम् ।
कल्पद्रुम समाख्याता चिन्तामणि विभूषिता ।।
रेजनाः किं पश्यन्ति रेणुकां कामधेनुकाम् ।
धर्मार्थकाममोक्षाणां पुरुषाणां चतुर्विधां ।।
एकवीरा प्रसादेन सिध्यन्ते नात्र संशयः ।
सर्वं तीर्थाभिषेकं तु सर्वयज्ञ फलं लभेत् ।।
आषाढे चैव कार्त्तिक्यां रेणुका दर्शनेन तु ।
पृथिव्यां यानि तीर्थानि समुद्रा सरितानि च ।।
एकवीरा परं नास्ति सद्यः प्रत्यय कारकम् ।
कार्तिक्यां कृत्तिकायोगें यः पश्यन्तीह रेणुकाम् ।।
न तेषां पुनरावृत्ति कल्प कोटि शतैरपि ।
श्री सिंहामलकं देव देवदेवेन सेवितम् ।।

मुक्तिगता समासाद्य द्विसप्तति चतुर्मुखाः ।
देव देवो तथा रुद्र संभेदो भास्करालयम् ।।

तोयं मेरुस्तडागस्य सद्यः पापहराणि षट् ।
कुरुक्षेत्रे सकृत्तीर्थे राहुग्रस्ते दिवाकरे ।।

प्रयागं च सदातीर्थं गया गंगा च रेणुका ।
आधारभूत निलयो ललनारूप धारिणी ।।

क्षुधा तृषा च दुःखघ्नी तां वन्दे रेणुकामहम् ।
ये पश्चिमास्तु ये सिद्धा पूर्वायै ये च संस्थिता ।।

एकवीरा परं बीजं शाश्वतं पदमव्ययम् ।
मायाबीजेन या प्रोक्ता हंकारार्द्ध कला स्मृता ।
स योनिः सर्व मन्त्राणां सा शक्तिः रेणुका स्मृता ।।

किं तस्य बहुभिर्मन्त्रैर्वेदसिद्धान्तविस्तरे ।
एक वीरा महामन्त्रं सर्व काम फलप्रदम् ।।

मूलमन्त्रमिदं प्रोक्तं हंसभेदेन संस्थितम् ।
स साक्षाद् भैरवे प्रोक्ता एकवीरं परात्परम् ।।

शिव शक्तिमिदं बीजं रेणुकामिदमव्ययम् ।
सर्व मंगल माङ्गल्ये पवित्रं पाप नाशनम् ।।

यः इदं पठते नित्यं त्रिसन्ध्यं श्रद्धयान्वितम् ।
आयुरारोग्यमैश्वर्यं पदं निर्वाणमाप्नुयात् ।।

अचलां श्रियमाप्नोति पुत्रदारादि सम्पदाम् ।
भुञ्जते विपुलान्भोगान् त्रैलोक्यं मोहयेद् ध्रुवम् ।।

एकवीरा इदंबीजं त्रैलोक्ये यः पठेन्नरः ।
ऐश्वर्यं लभते राज्यं वागैश्वर्यं च जायतें ।।

दुर्वृत्तानामशेषेण तथा दुःस्वप्न दर्शने ।
रक्षोभूत पिशाचेभ्यो ग्रहपीडां व्यपोहति ।।

रेणुका परमं स्तोत्रं ये जपन्ति च मानवाः ।
प्राप्नुयात्परमां सिद्धि अणिमादि गुणाष्टधा ॥

मातापुरस्थिता देव मातृ पीठोद्भवा शिवा ।
महादेवेन संस्तुत्य भुक्ति-मुक्ति फलप्रदाम् ॥

रेणुकाया इदं स्तोत्रं पठिष्यति दिने दिने ।
स गच्छेत् परमं स्थानं यत्रदेवो महेश्वरः ॥

इति श्री कौलार्णवे श्री भैरव प्रोक्तं रेणुकास्तवराजस्तोत्र सम्पूर्णम् ।

॥ श्री रेणुकार्पणमस्तु ॥

# अथ श्री रेणुका स्तोत्रम्

श्री गणेशाय नमः
श्री सरस्वत्यै नमः
श्री गुरुभ्यो नमः
श्री रेणुकाम्बायै नमः

ॐ नमः परमानन्दे सर्व देवमयी शुभे ।
अकारादि क्षकारान्तं मातृका मन्त्र मालिनी ॥ १ ॥
एकवीरे एकरूपे महारूपे अरूपिणी ।
अव्यक्ते व्यक्तिमापन्ने गुणातीते गुणात्मिके ॥ २ ॥
कमले कमलाभासे हृत्सत्चित्तरणिकालये ।
नाभिचक्रस्थिते देवि कुण्डली तन्तुरूपिणी ॥ ३ ॥
वीरमाता वीरवन्द्या योगिनी समरप्रिये ।
वेदमाता वेदगर्भे विश्वगर्भे नमोऽस्तुते ॥ ४ ॥
राममातर्नमस्तुभ्यं नमस्त्रैलोक्य रूपिणि ।
मह्यादिकं पञ्चभूत जमदग्निप्रिया शुभे ॥ ५ ॥
यैस्तु भक्त्या स्तुता ध्याता अर्चयित्वार्पितेशुभे ।
भोगमोक्षप्रदे देवि कामेश्वरि नमोऽस्तुते ॥ ६ ॥
नमोऽस्तुते निरालम्बे परमानन्द विग्रहे ।
पञ्चभूतात्मके देवि भूतभावविवर्जिते ॥ ७ ॥
महारौद्रे महाकाये सृष्टि संहार कारिणि ।
ब्रह्माण्ड गोलकाकारे विश्वरूपे नमोऽस्तुते ॥ ८ ॥

चतुर्भुजे खड्गहस्ते महाडमरुधारिणि ।
शिरः पात्र धरे देवि एकवीरे नमोऽस्तुते ॥ ९ ॥

नीलाम्बरे नीलवर्णे मयूरपिच्छ धारिणि ।
वनभिल्ल धनुर्वामे दक्षिणे वाणधारिणि ॥१०॥

रौद्रकाये महाकाये सहस्रार्जुन भञ्जनि ।
एकं शिरः पुरास्थित्वा रक्तपात्रे च पूरितम् ॥११॥

मृतधारा पिवन्देवि रुधिरं दैत्य देहजम् ।
रक्तवर्णे रक्तदन्ते खड्ग लांगल धारिणि ॥१२॥

वामहस्ते च खट्वाङ्गं डमरुं चैव दक्षिणे ।
प्रेतवाहनके देवि ऋषिपत्नी च देवते ॥१३॥

एकवीरे महारौद्रे मालिनी विश्वभैरवि ।
योगिनी योगयुक्ता च महादेवी महेश्वरी ॥१४॥

कामाक्षी भद्रकाली च हुंकारी त्रिपुरेश्वरी ।
रक्तवस्त्रे रक्तनेत्रे महात्रिपुर सुन्दरी ॥१५॥

रेणुका सूनुयोगी च भक्तानामभयंकरी ।
भोगलक्ष्मीर्योगलक्ष्मी दिव्यलक्ष्मीश्च सर्वदा ॥१६॥

कालरात्रि महारात्रि मद्यमांस शिवप्रिये ।
भक्तानां श्रीपदे देवी लोकत्रय विमोहिनी ॥१७॥

क्लींकारी कामपीठे च ह्लींकारी च प्रबोध्यता ।
श्रींकारी च श्रियादेवी सिद्धलक्ष्मीश्च सुप्रभा ॥१८॥

महालक्ष्मीश्च कौमारी कौवेरी सिंहवाहिनी ।
सिंह प्रेतासने देवी रौद्री क्रूरावतारिणी ॥१९॥

दैत्या नारी कुमारी च रौद्र दैत्यनिपातिनी ।
त्रिनेत्रा श्वेतरूपा च सूर्य कोटि समप्रभा ॥२०॥

खड्गिनीवाणहस्ता च आरूढा महिषवाहिनी ।
महाकुण्डलिनी साक्षात् कंकाली भुवनेश्वरी ॥२१॥

कृत्तिवासा विष्णुरूपा हृदया देवतामया ।
देवमारुत माता च भक्त माता च शंकरी ॥२२॥
चतुर्भुजे चतुर्वक्त्रे स्वस्तिपद्मासनस्थिते ।
पञ्चवक्त्रा महागङ्गा गौरी शंकरवल्लभा ॥२३॥
कपालिनी देवमाता कामधेनुस्त्रयोगुणी ।
विद्या एकमहाविद्या श्मशानप्रेतवासिनी ॥२४॥
देवत्रिगुण त्रैलोक्या जगत्त्रय विलोकिनी ।
रौद्रा वैतालि कंकाली भवानी भववल्लभा ॥२५॥
काली कापालिनी क्रोधा मातंगी वेणुधारिणी ।
रुद्रस्य न पराभूतारुद्रदेहार्द्ध धारिणी ॥२६॥
जया च विजया चैव अजया च पराजिता ।
रेणुकायै नमस्तेऽस्तु सिद्धदेवी नमो नमः ॥२७॥
श्रियैदेवी नमस्तेऽस्तु दीननाथे नमो नमः ।
जयतु देव देवस्त्वं सर्व देवी नमोऽस्तुते ॥२८॥
देव देवस्य जननी पंच प्राण प्रपूरिते ।
त्वत्प्रसादाय देवेशि देवाक्रन्दति विष्णवे ॥२९॥
महाबले महारौद्रे सर्व दैत्य निपातिनी ।
आधारा बुद्धिदा शक्तिः कुण्डली तन्तुरूपिणी ॥३०॥
षट्चक्रमणे देवी योगिनी दिव्य रूपिणी ।
कामिका कामरक्ता च लोकत्रय विलोकिनी ॥३१॥
महानिद्रा मद्यनिद्रा मधुकैटभ भञ्जनी ।
भद्रकाली त्रिसन्ध्या च महाकाली कपालिनी ॥३२॥
रक्षिता सर्वभूतानां दैत्यानां च क्षयंकरी ।
शरण्यं सर्वसत्वानां रक्षत्वं परमेश्वरी ॥३३॥
त्वामाराधयते लोके तेषां राज्यं च भूतले ।
आषाढ़े कार्तिके चैव पूर्णपूर्ण चतुर्दशी ॥३४॥

आश्विनें पौषमासे च कृत्वा पूजां प्रयत्नतः ।
गन्ध पुष्पैश्च नैवेद्यैस्तोषितां पञ्चभिः सह ॥३५॥
यं यं प्रार्थयते नित्यं तं तं प्राप्नोति निश्चितं ।
तत्त्वं मे वरदे देवि रक्ष मां परमेश्वरि ॥३६॥
तव वामांकितं देवी रक्ष मे सकलेश्वरी ।
सर्व भूतोदये देवी प्रसाद वरदे शिवे ॥३७॥

## श्री देव्युवाच

वरं ब्रूहि महाभाग राज्यं कुरु महीतले ।
मामाराध्यते लोके भयं क्वापि न विद्यते ॥३८॥
मम मार्गे च आयान्ती भीर्देवी मम सन्निधौ ।
अभार्यो लभते भार्यां निर्धनो लभते धनं ॥३९॥
विद्यां पुत्रमवाप्नोति शत्रुनाशं च विन्दति ।
अपुत्रो लभते पुत्रान् बद्धो मुच्येत बन्धनात् ॥४०॥
कामार्थी लभते कामं रोगी आरोग्यमाप्नुयात् ।
मम आराधनं नित्यं राज्यं प्राप्नोति भूतले ॥४१॥
सर्वं कार्याणि सिध्यन्ति प्रसादान्मे न संशयः ।
सर्वं कार्याण्यवाप्नोति दीर्घायुश्च लभेत्सुखी ॥४२॥

## श्री परशुराम उवाच

अत्र स्थानेषु भवतां अभयं कुरु सर्वदा ।
यं यं प्रार्थयते नित्यं तं तं प्राप्नोति निश्चितम् ॥४३॥

प्रयागे पुष्करे चैव गंगा सागर संगमे ।
स्नानं च कुरुते नित्यं नित्यं च चरणोदके ।।४४।।
इदं स्तोत्रं पठेन्नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ।
सर्वान् कामानवाप्नोति प्राप्यते परमं पदम् ।।४५।।

।। इति श्री वायुपुराणे परशुरामकृते श्री रेणुकास्तोत्रं सम्पूर्णम् ।

।। श्री रेणुकाम्बार्पणमस्तु ।।

# अथ श्री रेणुका स्तोत्र प्रारम्भ

श्री गणेशाय नमः
श्री रेणुकायै नमः

भैरवी उवाच

देव देव महेशान महादेव दयानिधे ।
यत्त्वया पठचते नाथ रेणुका स्तोत्रमुत्तमम् ।।

ह्रीं रेणुकायै विद्महे राममात्रे च धीमहि,
तन्नो गौरी प्रचोदयात् ।

इति श्री रेणुका गायत्री मन्त्रः

तदहं श्रोतुमिच्छामि सर्वकाम समृद्धिदम् ।
सर्वार्थ साधकं दिव्यं साधकानां सुखावहम् ।।

महाभैरव उवाच

शृणुदेवि प्रवक्ष्यामि रेणुकास्तोत्रमुत्तमम् ।
यस्य स्मरणमात्रेण सर्वान् कामानवाप्नुयात् ।।
स्तोत्रस्यास्य ऋषिः सोऽहं छन्दोऽनुष्टुप्प्रकीर्तितम् ।
देवता तु पराशक्तिः रेणुका जगदम्बिका ।।
न्यासं जालं तथा ध्यानं मूलमन्त्रेण वै चरेत् ।।

## ध्यानम्

मध्ये बद्ध मयूरपिच्छनिकरां श्यामां प्रवालाधराम् ।
गुञ्जाहारधरां धनुश्शरकरां नीलाम्बराऽम्बराम् ॥
शृङ्गीवादनतत्परां सुनयनां मूर्द्धालकैर्बर्बराम् ।
भिल्लीवेषधरां नमामि शबरीं त्वामेकवीरां पराम् ॥

मानसे योनिमुद्रां प्रदर्श्य :—

ॐ ह्रींकार रूपिणी देवी रेणुका सुखदायिनी ।
क्लींकार रूपिणीश्रद्धा सिद्धिसौभाग्यदायिनी ॥
वाग्भवा कामरूपा च कामकल्लोल मालिनी ।
षट्बीजा च त्रिबीजा च नवबीजा न वा नवा ॥
नवभैरव पूज्या च नवमी नव वल्लभा ।
नमस्तस्यै नमस्तस्यै रेणुकायै नमो नमः ॥
चैतन्य रूपिणी विद्या निर्गुणा गुणपारगा ।
नमस्तस्यै नमस्तस्यै रेणुकायै नमो नमः ॥
प्रपञ्च रहिता पृथ्वी लक्षणातीत विग्रहा ।
नमस्तस्यै नमस्तस्यै रेणुकायै नमोनमः ॥

या कामधेनुः सकलार्थदात्री सर्वेश्वरीसर्वभयापहन्त्री ।
या सच्चिदानन्दकरी जनानां सा रेणुकापातु निरन्तरं माम् ॥
या राममाता रमणीयरूपा रमाधवाद्यैरभिपूजितांघ्रिः ।
नित्योत्सवा निर्जर वन्दिता च सा रेणुका पातु निरन्तरं माम् ॥
या कालरात्रिः कलिकल्मषघ्नी कल्याण शैलामलवासवासा ।
योगेश्वराराधितपादपद्मा सा रेणुका पातुनिरन्तरं माम् ॥
या भर्ग पत्नी भवरोगहन्त्री भक्तेश्वरी भक्तजनाभिनंदिनी ।
भव्या भवानी भवपूजिता या सा रेणुका पातु निरन्तरं माम् ॥

या एकलाऽनेक शरीरधारिणी दिव्याम्बरादिव्य सुरत्व पूजिता ।
शिवापरा सर्व–सुखैक–भूमिदा सा रेणुका पातुनिरन्तरं माम् ।।

नमस्ते राममात्रे ते नमः कल्याण दायिनी ।
नमः सकल संघात्र्यै रेणुकायै नमोऽस्तुते ।।
ब्रह्मरूपे नमस्तेऽस्तु नमस्ते शिवरूपिणी ।
विष्णुरूपे नमस्तेऽस्तु रेणुकायै नमोऽस्तुते ।।
सर्व शक्त्यै नमस्तेऽस्तु सर्व व्यापिनि सर्वदा ।
सर्वार्थ साधिके नित्यं रेणुकायै नमोऽस्तुते ।।
नमो नमस्ते भैरव्यै भवभीति निवारिणी ।
भवान्यै भक्तवश्यायै रेणुकायै नमोऽस्तुते ।।
विश्वाधारे विश्वमये विश्वेश्वर–विलासिनी ।
विश्वम्भरि विशालाक्षि रेणुकायै नमोऽस्तुते ।।
कमले कमलावासे कमलोद्भवपूजिते ।
कामदे कामवरदे रेणुकायै नमोऽस्तुते ।।
विश्वबीजे विराटायै विरजाम्बरधारिणि ।
यन्त्रेश्वरि महामाये रेणुकायै नमोऽतुते ।।

निखिल निगमगीते शम्भुवामाङ्क संस्थे,
शरणजनसुतारे तारमन्त्राधिरूढे ।
सुरवर मुनिवर्यैः पूजिते पात्रहस्ते,
परमसुख–सुखाब्धे रेणुके त्वं प्रसीद ।।

**भैरव उवाच**

रेणुका स्तोत्रमेतत्ते कथितं भुवनेश्वरि ।
सर्व कामप्रदंनॄणां सर्वारिष्ट विनाशकृत् ।।

सर्वाभीष्ट करं दिव्यं पठनीयं प्रयत्नतः ।
इत्यागम रहस्ये वै भैरवेण समीरितम् ॥

॥ इति श्री आगम रहस्ये भैरवप्रोक्तं रेणुकास्तोत्रं सम्पूर्णम् ॥

## अथ श्री रेणुका मन्त्रः

अस्य श्री रेणुका मन्त्रस्य श्री रुद्र ऋषिः श्री रेणुका देवी देवता विराट् छन्दः क्लीं बीजं श्री रेणुका देवी शक्तिः क्लीं कीलकं ममाभीष्ट सिद्धये जपे विनियोगः ।

### ध्यानम्

प्रफुल्लहारकेयूर कुण्डलादि विराजिताम् ।
प्रसन्नवदनां शान्तां श्री देवीं रेणुकां भजे ।

### मन्त्रः

१.—क्लीं क्लीं क्लीं रेणुका देव्यै नमः ।
२.—क्लीं क्लीं क्लीं स्वाहा ।
३.—क्लीं रेणुकायै स्वाहा ॥

### ध्यानम्

लोलाल्यालि-लसत्प्रफुल्लसुमनो जालोल्लसत्कानने,
भिल्लीवेषमनङ्गवेगजनकं धृत्वा चलन्तीं शनैः ।
लोलापाङ्ग तरङ्गरङ्गसुदृशा सम्मोहयन्तीं शिवं,
चञ्चच्चञ्चलनूपुरध्वनियुता वर्वर्त्ति सर्वार्थदा ॥

# मुचुकुन्द कृतं रेणुका स्तोत्रम्

## मुचुकुन्द उवाच

अनाथमकृतप्रज्ञं अज्ञानतिमिरावृतम् ।
मोहपङ्कनिमग्नञ्च मामुद्धर सुरेश्वरि ॥

त्वां रेणुकेति वरदेति च सुन्दरीति,
वागीश्वरीति सकलेति च पार्वतीति ।
सिद्धेश्वरीति सुभगेति च ये वदन्ति,
तान्देवि नित्यमनघान् परिपालय त्वम् ॥

अम्बेति विश्वजननीति जगद्धितेति,
विद्येति धर्मनिरतेति परात्परेति ।
आद्येति वेद जननीति च ये वदन्ति
तान्देवि नित्यमनघान् परिपालय त्वम् ॥

त्वां वेदशास्त्रमितिहास विनोदनीति,
ब्रह्मेति ब्रह्म गमकेति सुरप्रियेति ।
एकेत्यनन्त फलदेति च ये वदन्ति,
तान्देवि नित्यमनघान् परिपालय त्वम् ॥

आनन्दभूत निलयेत्यनलोद्भवेति,
गूढेति भाव गमकेति शुभावहेति ।
विश्वेश्वरीति कमलेति च ये वदन्ति,
तान्देवि नित्यमनघान् परिपालय त्वम् ॥

नित्येति दिव्यचरणेति महाव्रतेति,
हृद्येति भक्त–जनदुःख–विनाशनीति ।
श्रद्धेति रामजननीति च ये वदन्ति,
तान्देवि नित्यमनघान् परिपालय त्वम् ।।
त्वां पुण्यदेति जमदग्निऋषिप्रियेति,
गङ्गेति तत्वविहितेति परापरेति ।
शुद्धेति पातक कदम्ब कुठारकेति,
तान्देवि नित्यमनघान् परिपालय त्वम् ।।
त्वां राजनीति परमामृत–भोजनेति,
शृङ्गार–मुख्य–नवषट् च रसप्रियेति ।
लक्ष्मीप्रदेति सुमुखेति च ये वदन्ति,
तान्देवि नित्यमनघान् परिपालय त्वम् ।।

### स्कन्द उवाच

**स्तुतैवंमुचुकुन्देन रेणुका ब्रह्मरूपिणी ।**
**प्रत्यक्ष रूपा प्राहेदं प्रसन्नाहं मुनीश्वर ।।**

### देव्युवाच

**मुचुकुन्द त्वया तुल्यः कश्चिद्भक्तो न विद्यते ।**
**किं प्रार्थयसि मत्तस्त्वं ब्रूहि यत्तेऽभि वाञ्छितम् ।।**

### मुचुकुन्द उवाच

त्वद्भक्तिमतुलां देहि देवित्वं विश्वरूपिणी ।
नान्यदिच्छाम्यहंमातः सत्यमेतन्मयोदितम् ।।
आत्मनः स्वं परं ब्रह्म स्वरूपं दर्शयस्व मे ।
यदि तुष्टासि दासस्य कृपया त्वं ममोपरि ।।

**इति श्री स्कन्दपुराणे रेणुकामाहात्म्ये श्री मुचुकुन्द कृतं रेणुका स्तोत्रम् ।**

# रेणुका स्तोत्रम्

त्वदीयपदरेणुके शिरसि मामके रेणुके ।
निधाय वरदं करं ननुदरं ममाऽनीनशः ॥
स्ववत्सलतयाऽनुदोर्नयन लालनछद्मना ।
प्रमोदभर दृग्झर स्तुतमदश्रुभिर्धावयेः ॥
प्रणम्य सुषमामिषद् दृग्निमेष शीर्षोल्लस-।
त्किरीटकुल संकुलं परिमलाऽलमङध्रयुत्पलम् ॥
मनोलिरयमुन्मदः सपदि तेऽनुजिघ्रन्मनाक् ।
तदन्यसुमनस्सु किं व्रजति नाधुना तत्स्मरन् ॥
भजन्तु विषयान् सर्जूविषयिणो विषाणीवते ।
रसा रसिक मौलिना मम मनोऽलिनान्यक्कृताः ॥
श्रुतं तदवलोकितं भवतु तत्स्पृशन् जिघ्रता ।
रसाल-पद-पङ्कजं जननि ते सदा स्वाद्यताम् ॥
विजित्य हृदुपस्थितो मुहुरुपस्थितानन्दकम् ।
विशुद्धिमुपसंहरन् विरमताद्भवद्भक्तिषु ॥
गिरा भजतु नाम ते करघृतार्चनोपस्करं ।
प्रयातु तव मन्दिरं विसृजतु त्वदन्यादरम् ॥
मुमोच किल मां प्रसूः रथविदग्रणीरग्रजा ।
पितापि दयितोऽग्रजो पर इहाश्रयो यस्य मे ॥
श्रयेहमधुनेहकं व्रजिन पुञ्जवाक्याहतः ।
प्रयामि दिशमम्बिके निदिश कांदिशीकोऽद्यकाम् ॥
यथायथमनुष्ठिताः स्तुतिकथाः कथंचिन्नते ।
स्मरामि च कृतं न ते तेर्चनमकिञ्चनः किञ्चन ॥

तपोमनुजपोऽप्युपोषणमकारि न त्वत्कृते- ।
ऽपराद्धममुमम्बिके ! वद किमुद्धरिष्यस्यतः ॥
विधिर्हरिहरादयो यदवधीरिता नान्तिके ।
पुरन्दर पुरोगमा न पुर आसितुं शक्नुयुः ॥
निगृह्य कृपयाम्बिके ! गुणगणैः स्वकीयैर्दृढं ।
बधान न यथा पुनः श्रयति हृत्पशुः शोच्यताम् ॥
अगाध वदपारद्रुम – मदादियादो युता ।
त्रिवेक मुखमत्सखाऽप्युदधिवीचिमग्नाः परम् ॥
निधाय चरणौ पुरो नियमयाऽऽशु तृष्णानदी ।
विनश्यति यथाम्बिके ! न परमार्थ-मार्गोमिम ॥
स्तवीमि जगदग्नि सद्गृहिणि नाम पृथ्वीगतं ।
गृणन् परशुराम-सज्जननि ! जल्पितार्थाप्तये ॥
तदम्ब ! कृपयाऽऽप्स्यतेऽद्य वयसो न पञ्चाशता ।
मयापद्धति कोऽपि चेत्स फलमाप्नुतात्तादृशम् ॥

**इति श्रीमत्पूज्यपाद विनायक शास्त्रि वेताल विरचितं**

**॥ श्री रेणुका स्तोत्रं सम्पूर्णम् ॥**

## श्री रेणुका स्तोत्रम्

ऐंद्रयादि वंदितपदे वरदेऽभीष्टकामदे ।
कामदेवार्चितेऽनंते रेणुकेऽम्ब नमोऽस्तुते ॥
एकवीरे निजाधारे रुचिरे सज्जनादरे ।
उदारे रेणु संजाते रेणुकेऽम्ब नमोऽस्तुते ॥
करुणा रस सम्पूर्णे नयने सुस्मिताननें ।
शोभने पाहि नो भीते रेणुकेऽम्ब नमोऽस्तुते ॥
वीरमातर्महादेवी त्वदन्या का पराभुवि ।
तारिणी दुर्गतोऽनंते रेणुकेऽम्ब नमोऽस्तुते ॥
राममातर्महामाये जमदग्नि प्रियेऽभये ।
विजये वेद विनुते रेणुकेऽम्ब नमोऽस्तुते ॥
यैर्रचिते तव पदे ते धन्याः परमेपदे ।
निहितास्ते सुरनुते रेणुकेऽम्ब नमोऽस्तुते ॥
न त्वदन्यागतिर्देवि परमाखलु शाम्भवि ।
भुक्तिमुक्तिप्रदे शान्ते रेणुकेऽम्ब नमोऽस्तुते ॥
यः केशवेश्वराश्चापि सृष्टिस्थित्यन्तकारिणः ।
प्रसादादेव तेऽनंते रेणुकेऽम्ब नमोऽस्तुते ॥

जगदम्ब नमोऽस्तु रेणुके परिपाहीश्वरि नः सुभावुके ।
जय लाभ यशः प्रदे मुदे स्तुतिरेषास्तु तवाखिलार्थदे ॥

नावाहनं नार्चन पद्धतिं ते,
जाने न भक्तिं त्वयि मे भवान्तके ।
अथापि मां त्वं कुल देविभक्त,
कुलोद्भवं पाह्यपि चार्थ सक्तम् ॥

मातापुर निवासिन्याः श्रीदेव्याः स्तोत्रमुत्तमम् ।
यः पठेत् प्रयतो भक्त्या सर्वान्-कामान् स आप्नुयात् ॥

**इति श्री प० श्री वासुदेवानन्द सरस्वती विरचितं**

**॥ श्री रेणुका स्तोत्रं सम्पूर्णम् ॥**

* * *

# अथ श्री रेणुका स्तोत्रम्

नमस्तेऽस्तुते महादेवि शिवे कल्याण शाम्भवि ।
प्रसीद वेदविनुते जगदम्ब नमोऽस्तुते ॥ १ ॥
जगतामादि भूता त्वं जगत्त्वं जगदाश्रया ।
एकाऽप्यनेकरूपासि जगदम्ब नमोऽस्तुते ॥ २ ॥
सृष्टिस्थिति विनाशानां हेतुभूते मुनिस्तुते ।
प्रसीद देवविनुते जगदम्ब नमोऽस्तुते ॥ ३ ॥
सर्वेश्वरि नमस्तुभ्यं सर्वसौभाग्यदायिनि ।
सर्व शक्तियुतेऽनन्ते जगदम्ब नमोऽस्तुते ॥ ४ ॥
विविधारिष्ट शमनि त्रिविधोत्पात नाशिनि ।
प्रसीद देवि ललिते जगदम्ब नमोऽस्तुते ॥ ५ ॥
प्रसीद करुणासिन्धो त्वत्तः कारुणिकापरा ।
यतो नास्ति महादेवि जगदम्ब नमोऽस्तुते ॥ ६ ॥
शत्रूञ्जहि जयं देहि सर्वान् कामांश्च देहि मे ।
भयं नाशय रोगांश्च जगदम्ब नमोऽस्तुते ॥ ७ ॥
जगदम्ब नमोऽस्तुते
हिते जय शंभोर्दयितेमहामते ।
कुलदेवि नमोऽस्तुते
सदा हृदि मे तिष्ठ यतोऽसि सर्वदा ॥ ८ ॥
मातापुर निवासिन्या देव्याः स्तोत्रमिदं परम् ।
यः पठेत् प्रयतोभक्त्या सर्वान्कामान् स आप्नुयात् ॥ ९ ॥

**इति श्री प० वासुदेवानन्द सरस्वती विरचितं**
**॥ श्री मातापुर वासिन्या देव्याः स्तोत्रं सम्पूर्णम् ॥**

# श्री रेणुका हृदयमूल प्रारम्भः

**श्री गणेशाय नमः**

**श्री रेणुकायै नमः**

**स्कन्द उवाच**

भगवन् देव देवेश परमेश शिवापते ।
रेणुका हृदयं गुह्यं कथयस्व प्रसादतः ॥

**शिव उवाच**

शृणु षण्मुख वक्ष्यामि रेणुका हृदयं परम् ।
जपन्यो हृदयं नित्यं तस्य सिद्धिः पदेपदे ॥
रेणुका हृदयस्यास्य ऋषिरानन्द भैरवः ।
छन्दोभृत् विराट् प्रोक्तं देवता रेणुका परा ॥
क्लीं बीजं कामदा शक्तिर्महामायेति कीलकम् ।
सर्वाभीष्ट फलप्राप्त्यै विनियोग उदाहृतः ॥

ॐ क्लीमित्यङ्गुष्ठादि हृदयादिन्यासं कृत्वा ध्यायेन्नित्यमितिध्यात्वा हृदयं पठेत् ।

**आनन्द भैरव उवाच**

**ॐ नमो रेणुकायै सर्वभूतिदायै सर्वकर्त्र्यै सर्वहर्त्र्यै सर्व पालिन्यै सर्वार्थ दात्र्यै सच्चिदानन्द रूपिण्यै एकलायै कामाक्ष्यै कामदायिन्यै भर्गायै भर्गरूपिण्यै भगवत्यै सर्वेश्वर्यै एकवीरायै वीरवंदितायै वीरशक्त्यै वीरमोहिन्यै**

वीर सुवेश्यै ह्रींकारायै क्लींकारायै वाग्भवायै ऐंकारायै ॐकारायै श्रींकारायै दशार्णायै द्वादशार्णायै षोडशार्णायै त्रिबीजकायै त्रिपुरायै त्रिपुरहर वल्लभायै कात्यायिन्यै योगिनीगणसेवितायै चामुण्डायै मुण्डमालिन्यै भैरव सेवितायै भीतिहरायै भवहारिण्यै कल्याण्यै कल्याणदायै नमस्तेनमस्ते ।

नमो नमः कामुक कामदायै नमो नमो भक्तदयाघनायै ।
नमोनमः केवल केवलायै नमो नमो मोहिनि मोहदायै ॥
नमो नमः कारण कारणायै नमो नमः शान्तिरसान्वितायै ।
नमो नमो मंगल मंगलायै नमो नमो मंगलभूतिदायै ॥
नमो नमः सद्गुण वैभवायै विशुद्ध विज्ञान सुखप्रदायै ।
नमोनमः शोभनशोभितायै नमो नमः शक्ति समावृतायै ॥

नमः शिवायै शान्तायै नमो मंगलमूर्तये ।
सर्व सिद्धिप्रदायै ते रेणुकायै नमो नमः ॥
ललितायै नमस्तुभ्यं पद्मावत्यै नमो नमः ।
हिमाचल सुतायै ते रेणुकायै नमो नमः ॥
विष्णु वक्षःस्थलावासे शिव वामांक संस्थिते ।
ब्रह्माण्यै ब्रह्ममात्रे ते रेणुकायै नमोऽस्तुते ॥
राममात्रे नमस्तुभ्यं जगदानन्द कारिणी ।
जमदग्निप्रियायै ते रेणुकायै नमो नमः ॥
नमो भैरवरूपायै भीति हन्त्र्यै नमो नमः ।
नमः परशुरामस्य जनन्यै ते नमो नमः ॥
कमलायै नमस्तुभ्यं तुलजायै नमो नमः ।
षड्चक्र देवतायै ते रेणुकायै नमो नमः ॥
अहिल्यायै नमस्तुभ्यं कावेर्यै नमो नमः ।
सर्वर्थि पूजनीयायै ते रेणुकायै नमो नमः ॥
नर्मदायै नमस्तुभ्यं मन्दोदर्यै नमो नमः ।
अद्रि संस्थानायै ते रेणुकायै नमो नमः ॥

त्वरितायै नमस्तुभ्यं मन्दाकिन्यै नमो नमः ।
सर्व मन्त्राधिदेवतायै ते रेणुकायै नमो नमः ।।
विशोकायै नमस्तुभ्यं कालशक्त्यै नमो नमः ।
मधुपानोद्धतायै ते रेणुकायै नमो नमः ।।
तोतुलायै नमस्तुभ्यं नारायण्यै नमो नमः ।
प्रधानागुहरूपिण्यै रेणुकायै नमो नमः ।।
सिंहगायै नमस्तुभ्यं कृपासिद्धयै नमो नमः ।
दारिद्र्यवनदाहिन्यै रेणुकायै नमो नमः ।।
स्तन्यदायै नमस्तुभ्यं विनाशघ्न्यै नमो नमः ।
मधुकैटभहन्त्र्यै ते रेणुकायै नमो नमः ।।
त्रिपुरायै नमस्तुभ्यं पुण्यकीर्त्यै नमो नमः ।
महिषासुर निर्णाशायै ते रेणुकायै नमो नमः ।।
चेतनायै नमस्तुभ्यं वीरलक्ष्म्यै नमो नमः ।
कैलाश निलयायै ते रेणुकायै नमो नमः ।।
वगलायै नमस्तुभ्यं ब्रह्मशक्त्यै नमो नमः ।
कर्मफलप्रदायै ते रेणुकायै नमो नमः ।।
शीतलायै नमस्तुभ्यं भद्रकाल्यै नमो नमः ।
शुम्भदर्पहरायै ते रेणुकायै नमो नमः ।।
एलाम्बायै नमस्तुभ्यं महादेव्यै नमो नमः ।
पीताम्बर प्रभायै ते रेणुकायै नमो नमः ।।
नमः त्रिगायै रुक्मायै नमो ते धर्म शक्तये ।
अज्ञान कल्पितायै ते रेणुकायै नमो नमः ।।
कपर्दायै नमस्तुभ्यं कृपाशक्त्यै नमो नमः ।
वानप्रस्थाश्रमस्थायै, ते रेणुकायै नमो नमः ।।
विजयायै नमस्तुभ्यं ज्वालामुख्यै नमो नमः ।
महास्मृतिज्योत्स्नायै ते रेणुकायै नमो नमः ।।
नमः तृष्णायै धूम्रायै नमो ते धर्म सिद्धये ।
अर्द्ध मात्राक्षरायै ते रेणुकायै नमो नमः ।।

नमः श्रद्धायै वार्तायै नमो मेघ शक्तये ।
मन्त्राधिदेवतायै ते रेणुकायै नमो नमः ।।
जयदायै नमस्तुभ्यं शूलेश्वर्यै नमो नमः ।
अलकापुर संस्थानायै ते रेणुकायै नमो नमः ।।
नमः परायै ध्रौव्यायै नमः शेष शक्तये ।
ध्रुवमयी हृद्रूपायै ते रेणुकायै नमो नमः ।।
नमो नमः शक्ति समन्वितायै नमो नमः तुष्टि वरप्रदायै ।
नमो नमो मंडन मण्डितायै नमो नमो मञ्जुल मोक्षदायै ।।

## शिव उवाच

इत्येवं कथितं दिव्यं रेणुका हृदयं परम् ।
यः पठेत् सततं विद्वान् तस्य सिद्धिः पदे पदे ।।
राजद्वारे श्मशाने च संकटे दुरतिक्रमे ।
स्मरणाद्धृदयस्यास्य सर्वसिद्धिः प्रजायते ।।
दुर्लभं त्रिषुलोकेषु तस्य प्राप्तिर्भवेद्ध्रुवम् ।
वित्तार्थी वित्तमाप्नोति सर्वार्थी सर्वमाप्नुयात् ।।

**इत्यागमसारे शिवषण्मुखसंवादे आनन्द भैरवोक्तं रेणुकाहृदयं सम्पूर्णम्**

**ॐ क्लीं बीजात्मिकार्पणमस्तु**

**।। इति श्री रेणुका हृदयम् ।।**

# श्री रेणुका सहस्रनाम स्तोत्रम्

श्री गणेशाय नमः

श्री रेणुकायै नमः

गिरिपृष्ठे समासीनं शंकरं लोकशंकरम् ।
प्रणतः परिपप्रच्छ संशयस्थः षडाननः ॥

स्कन्द उवाच

तात सर्वेश्वरस्त्वं हि सर्वज्ञः सर्व भावनः ।
कथयस्व प्रसादेन रहस्यं सकलार्थदम् ॥
विजयः संकटे घोरे निर्विघ्नं बलमुत्कटम् ।
अन्येऽपि वाञ्छितार्थाश्च सिद्धयन्त्याशु विना श्रमम् ॥

शंकर उवाच

साधुपृष्ठं महाबाहो संशयो मास्तु मास्तुते ।
यदनुष्ठानमात्रेण सर्वान्कामानवाप्स्यसि ॥
कस्य चिन्न यदाख्यातं तद्रहस्यं वदाम्यहम् ।
स्तोत्रं सहस्र नामाख्यं रेणुकायास्तु सिद्धिदम् ॥
सद्यः प्रत्ययकामस्त्वं शृणु षणमुख भक्तितः ।
सर्वे देवाश्च वेदाश्च क्षीणवीर्या युगे युगे ॥
अक्षीणफलदात्रीयं त्रिसत्यं मम भाषितम् ।
सर्व देव मयी देवी रेणुका कामदार्चिता ॥
पुरदाहे मया ध्याता तथैव गरलाशने ।
विष्णुना सागरोन्माथे ब्रह्मणा सृष्टि कर्मणि ॥

गोत्रभेदे मघवता जगती धारणेऽहिना ।
कामेन शंबरबधे रत्या तत्प्राप्तये पुनः ॥
गणाधीशेन सततं विघ्नवारणकर्मणि ।
किं वत्स बहुनोक्तेन हैमवत्या मदाज्ञया ॥
ध्यात्वा सर्वार्थदा सा हि सर्वलोकैकसंश्रया ।
महत्कार्योद्यतैरन्यैर्बहुभिश्चिन्तिता शिवा ॥
धर्मार्थ--काम--मोक्षार्थमवाङ्मनसगोचरा ।
तस्या एव प्रसादात्तां स्तौमि नामावलिच्छलात् ॥
ऋष्यादिकं च संक्षेपात्कथयामि षडानन ।
त्र्यंबकश्च ऋषिः प्रोक्तोऽनुष्टुप् छंदः प्रकीर्तितम् ॥
एकवीरा महामाया रेणुका दैवतं स्मृतम् ।
सर्वपापक्षयद्वारा प्रीत्यै देव्या मुहुर्मुहुः ॥
सर्वाभीष्टफलप्राप्तौ विनियोग उदाहृतः ।
रेणुका राममातेति महापुरनिवासिनी ॥
एकवीरा कालरात्रिरेकला नामभिः क्रमात् ।
अंगुष्ठादि करन्यासो हृदयादि षडङ्गकम् ॥
चतुर्थ्यंतैर्नमोन्तैश्च प्रणवादिभिराचरेत् ॥

अस्य श्री रेणुका सहस्रनामस्तोत्रमन्त्रस्य त्र्यम्बक ऋषिः । श्री रेणुका देवता । अनुष्टुप्छन्दः । सर्वपाप क्षयद्वारा श्री जगदम्बा रेणुका प्रीत्यर्थं सर्वाभीष्ट फल प्राप्त्यर्थं च जपे विनियोगः । अथन्यासः । ॐ रेणुकायै नमः अंगुष्ठाभ्यां नमः । ॐ राममात्रे नमः तर्जनीभ्यां नमः । ॐ महापुर निवासिन्यै नमः मध्यमाभ्यां नमः । ॐ एक वीरायै नमः अनामिकाभ्यां नमः । ॐ काल रात्र्यै नमः कनिष्ठिकाभ्यां नमः । ॐ एकलायै नमः करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि ।—

ॐ रेणुकायै नमः हृदयाय नमः । ॐ राममात्रे नमः शिरसे स्वाहा । ॐ महापुर निवासिन्यै नमः शिखायै वषट् ।

ॐ एकवीरायै नमः कवचाय हुं । ॐ कालरात्र्यै नमः नेत्रत्रयाय वौषट् । ॐ एकलायै नमः अस्त्राय फट् ।

## ध्यानम्

ध्यायेन्नित्यमपूर्ववेषललितां कंदर्पलावण्यदां
देवीं देवगणैरुपास्यचरणां कारुण्यरत्नाकराम् ।
लीलाविग्रहिणीं विराजितभुजां सच्चन्द्रहासादिभि-
र्भक्तानन्दविधायिनीं प्रमुदितां नित्योत्सवां रेणुकाम् ॥

ॐरेणुका रामजननी जमदग्निप्रियासती ।
एकवीरा महामाया कालरात्रिः शिवात्मिका ॥
महामोहा महादीप्तिः सिद्ध विद्या सरस्वती ।
योगिनी चन्द्रकासिद्धा सिद्धलक्ष्मीः शिवप्रिया ॥
कामदा कामजननी मातृका मन्त्रसिद्धिदा ।
मन्त्रसिद्धिर्महालक्ष्मी मातृमण्डलवल्लभा ॥
चंद्रिका चन्द्रकान्तिश्च सूर्यकान्तिः शुचिस्मिता ।
योगेश्वरी योगनिद्रा योगदात्री प्रभावती ॥
अनाद्यन्त स्वरूपा श्रीः क्रोधरूपा महागतिः ।
मनः श्रुति स्मृतिर्घाण चक्षुस्त्वग्रसना रसा ॥
मातृकापतिरुत्क्रोशा चंडहासा महावरा ।
महावीरा महाशूरा महाचापा रथस्थिता ॥
बर्हिपत्रप्रिया तन्वी बर्हिपत्रा चतुर्भुजा ।
नादप्रिया नादलुब्धा त्र्यक्षरा मृत-जीवनी ॥
अमृतामृतपानेष्टा सिंधुपा पात्रशालिनी ।
चण्डहासधरा शूरा वीरा डमरुमालिनी ॥
शिरोधरा पात्रकरा वरदावरवर्णिनी ।
त्रिमूर्तिर्वेदजननी वेदविद्या तपोनिधिः ॥
तपो युक्ता तपो लक्ष्मीस्तपसः सिद्धिदापरा ।
ललिता सात्विकी शान्ता राजसी रक्तदन्तिका ॥

एकला रेणुतनया कामाक्षी सत्परायणा ।
ऐन्द्री माहेश्वरी ब्राह्मी वैष्णवी वडवानला ॥
कौवेरी धनदा याम्या याम्याग्नेयी वायुतनुर्निशा ।
ईशानी नैर्ऋतिः सौम्या माहेन्द्री वारुणी समा ॥
सर्वर्षिध्येयचरणा नृवारणा नर वल्लभा ।
भिल्ली वेषधरा भिल्ली वर्वरालकमण्डिता ॥
शृङ्गीवादनसुरसा गुञ्जाहार विभूषणा ।
मयूरपिच्छाभरणा श्यामा नीलाम्बराशिवा ॥
कालिका रेणु दुहिता शिवपूज्या प्रियम्बदा ।
सृष्टिकृत् स्थितिकृत् क्रुद्धा पृथ्वी नारदसेविता ॥
संहारकारिणीन्द्राक्षी रक्षोघ्नी चन्द्रशेखरा ।
हुं फट् वौषट् वषड्रूपा स्वधा स्वाहा नमोमनुः ॥
सुषुप्तिर्जाग्रतिर्निद्रा स्वप्ना तुर्या च चक्रिणी ।
तारा मन्दोदरी सीताहल्या रुन्धतिका दितिः ॥
भागीरथी च कावेरी गौतमी नर्मदा मही ।
सरयूर्गौतमी भीमा त्रिवेणी गण्डकी सरी ॥
मानसं चन्द्रभागा च रेवा गंगा च वेदिका ।
हरिद्वारं मातृपुरं दत्तात्रेयनिवासभूः ॥
मातृस्थादि संस्थाना मातृमण्डलमण्डिता ।
मातृमण्डल सम्पूज्या मातृमण्डल मध्यगा ॥
नानास्थानावताराद्या नाना स्थान चरित्रकृत् ।
कमला तुलजात्रेयी कोल्लापुर निवासिनी ॥
मन्दाकिनी भोगवती दत्तात्रेयानुसूयका ।
षट्चक्र देवता पिंगा जमदग्नीश्वरार्द्धहृत् ॥
इडाख्या च सुषुम्नाख्या चन्दसूर्यगतिर्वियत् ।
चन्द्र सूर्य समाख्याता सर्वस्त्री निलयाध्वनिः ॥
समस्त विद्या तत्वज्ञा सर्वरूपा सुखाश्रया ।
पुण्यपापेश्वरी कीर्तिर्भोक्त्री भोग प्रवर्तिनी ॥

जामदग्न्यस्य जननी कविशक्तिः कवित्वदा ।
ह्लींकाराम्बा तमोरूपा क्लींकारा कामदायिनी ।।
वाक्प्रदैंकाररूपाच मुक्तिदौंकाररूपिणी ।
श्रींकाराखिलदानोक्ता सर्ववीजात्मिकात्मभूः ।।
जमदग्नि शिवाङ्कस्था धर्मार्थकाममोक्षदा ।
जमदग्नि क्रोधहरा जमदग्नि वचःकरी ।।
जमदग्नि तमोहन्त्री जमदग्नि सुखैकभूः ।
जितवीरा वीरमाता वीरभूर्वीरसेविता ।।
वीरदीक्षाकरी सौर्य दीक्षिता सर्वमङ्गला ।
कात्यायनी परीवारा कालकाला कलानिधिः ।।
अष्टसिद्धिप्रदा क्रूरा क्रूरग्रहविनाशिनी ।
साकारा च निराकाराहंकाराकारणा कृतिः ।।
सम्मता विषमघ्नी च विषहन्त्री विषाशना ।
व्यालाभरणसंहृष्टा ब्यालमण्डनमण्डिता ।।
अणुरूपा पराणुश्च सद्रूपा च महापरा ।
ह्रस्वा ह्रस्वपरा दीर्घा परदीर्घा परात्परा ।।
अद्वयाद्वयरूपा च प्रपंच रहिता पृथुः ।
स्थूलसूक्ष्मा निरीहा च स्नेहाञ्जन विवर्जिता ।।
ब्रह्मसूता महानिद्रा योगनिद्रा हरिस्तुता ।
हिरण्यगर्भरूपा च परब्रह्मस्वरूपिणी ।।
ब्रह्मशक्तिर्ब्रह्मविद्या विश्ववीजा निरञ्जना ।
अतुला कर्मरूपा च श्यामला परिघायुधा ।।
नारायणी विष्णुशक्तिः अवाङ्मनसगोचरा ।
घृतमारी पुण्यकरी पुण्यशक्तिरमाम्बिका ।।
रक्तवीजवधोद्रिक्ता रक्तचन्दन चर्चिता ।
सुरक्तपुष्पाभरणा रक्तदंष्ट्राभयप्रदा ।।
तीक्ष्णरक्तनखारक्ता निशुम्भप्राणकृन्तिनी ।
शुम्भप्राणनिहन्त्री च महामृत्युविनाशिनी ।।

सर्वदेव महाशक्तिर्महालक्ष्मी सुरस्तुता ।
अष्टादश भुजाच्यांशा दशदोर्दण्डमण्डिता ॥
निष्कलाष्टभुजा धात्री कल्पातीता मनोहरा ।
कल्पना रहिताच्याद्या दारिद्रय वन दाहिनी ॥
कौस्तुभा पारिजाता च हाहादिरूपधारिणी ।
तिलोत्तमाप्सरोरूपा नवनागस्वरूपिणी ॥
निधिरूपा समाधिस्था खड्गरूपा शवस्थिता ।
महिषासुरदत्तांघ्रिः सिंहगा सिंहगामिनी ॥
त्रिशूलधारिणी प्रौढ़ा वाला मुग्धा सुधर्मिणी ।
शंखभृच्चक्रभृत्पाशा गदाभृत्पाशमण्डिता ॥
कालशक्तिः कृपा सिन्धुर्मृगारिवरवाहना ।
गणराजमहाशक्तिः शिवशक्तिः शिवस्तुता ॥
हरिप्रिया श्राद्धदेवी प्रधाना गुहरूपिणी ।
गुहप्रीता गणेट्प्रीता कामप्रीता गुहस्थिता ॥
सर्वार्थदायिनी रौद्री नीलागतिरलोलुपा ।
चामुण्डा चित्रघण्टा च विश्वयोनिर्निरन्तरम् ॥
श्रावणी श्रम हन्त्री च संसार भ्रम नाशिनी ।
संसार फल सम्पन्ना संसारमतिरुच्चगा ॥
उच्चासन समारूढा विमानवरगामिनी ।
विमानस्था विमानघ्नी पाशघ्नी कालनाशिनी ॥
काल चक्रभ्रमभ्रान्ता कालचक्रप्रवर्तिनी ।
चेतना चापिनी भव्या भव्याभव्य विनाशिनी ॥
सिंहासन सुखाविष्टा क्षीरसागर कन्यका ।
वणिक्कन्या क्षेमकरी मुकुटेशावनिस्थिता ॥
श्रुतिज्ञा च पुराणज्ञा स्मृतिज्ञा वेद वादिनी ।
वेद वेदार्थतत्वज्ञा हिंगुला कालशालिनी ॥
इतिहासार्थविद्धर्म्या ध्येया हंत्री शिशुप्रिया ।
स्तन्यदा स्तन्यधारा च वनस्था पार्वतीशिवा ॥

मेना मैनाकभगिनी सुरभिर्जलमुक्तडित् ।
सर्ववीजांतरस्थात्री सकलागमदेवता ।।
स्थलस्थला जलस्था च वनस्था वनदेवता ।
क्षयहंत्री निहंत्री च निरातंकाभरप्रिया ।।
त्रिकालज्ञा त्रिरूपा च लीला विग्रहधारिणी ।
समाधिः पुण्यधिः पुण्या पापाज्ञान विनाशिनी ।।
दृश्या दृग्विषया दृष्टिः पापहन्त्री शमस्थिता ।
विरथा रथनिष्ठा च वरूथरथसंस्थिता ।।
मधुकैटभहन्त्री च सर्वदेवशरीरभृत् ।
त्रिपुरा पुण्यकीर्तिश्च नृपवश्यप्रदायिनी ।।
सांख्यविद्या त्रयी विद्या योगविद्या रविस्थिता ।
स्थावरा जंगमा क्षान्तिर्बलिशक्तिर्बलिप्रिया ।।
महिषासुर निर्णाशी दैत्य सैन्य परान्तकृत् ।
डमड्डमरु डांकारा वीरश्रीर्जनदेवता ।।
उद्गीथोद्गीथमर्यादा क्षीरसागरशायिनी ।
वीर लक्ष्मीर्वीरकान्ता शिवदूती सनातनी ।।
शक्रादि संस्तुता हृष्टा चण्डमुण्डविनाशिनी ।
पञ्चवक्त्रैकरूपा च त्रिनेत्रावलिमोहिनी ।।
धूम्रलोचन निर्नाशाहंकारोद्गार भाषिणी ।
एकमूर्तिस्त्रिधामूर्तिः त्रिलोकानन्ददायिनी ।।
भवानी दशमूर्तिश्च पञ्चमूर्तिर्जयन्तिका ।
दक्षिणा दक्षिणामूर्तिः अनेकैकादशाकृतिः ।।
एकचक्षुरनन्ताक्षी विश्वाक्षी विश्वपालिनी ।
चतुर्विंशति तत्वाद्या चतुर्विंशति तत्ववित् ।।
सोऽहं हंसाविशेषज्ञा निर्विशेषा निराकृतिः ।
यमघण्टामृतकला जयघण्टाजयध्वनिः ।।
पाञ्चजन्यस्फुरच्छक्तिर्हनुमच्छक्तिरास्तिका ।
शीलातरणशक्तिश्च रामशक्तिर्विराट् तनुः ।।

लंका प्रज्वलना वेला सागरक्रमणक्रमात् ।
नरनारायण प्रीतिर्लोकनीतिरघौघकृत् ॥
विपाशा पाशहस्ता च विश्वबाहुस्त्रिलिङ्गिका ।
प्राची प्रतीची विदिशा दक्षिणा दक्षकन्यका ॥
शिवलिङ्गप्रतिष्ठात्री शिवलिङ्गप्रतिष्ठिता ।
अज्ञान नाशिनी बुद्धिस्तत्वविद्यासुचेतना ॥
प्रकाशा स्वप्रकाशा च द्वयाद्वय विवर्जिता ।
असद्रूपा च सद्रूपा सदसद्रूपशालिनी ॥
कैलाश निलया गौरी वृषगा वृषवाहना ।
सोमसूर्याग्निनयना सोमसूर्याग्निविग्रहा ॥
विषमेक्षणदुर्धर्षा लंकादाहकरी दितिः ।
वैकुण्ठविलसन्मूर्तिः वैकुण्ठनिलयानिला ॥
नमोमूर्तिस्तमोमूर्तिस्तेजो मूर्तिरमेयधीः ।
सूर्यमूर्तिश्चन्द्रमूर्तिः यजमान शरीरिणी ॥
आप्यमूर्तिरिलामूर्तिः नरनारायणाकृतिः ।
विषयाज्ञानभिन्ना च विषयाज्ञाननिर्वृतिः ॥
सुखवित्सुखिनी सौख्या वेदवेदाङ्गपारगा ।
स्रुक् स्रुवा च वसोर्धारा यागशक्तिरशक्तिहृत् ॥
यज्ञकृत् प्राकृतिर्यज्ञा यज्ञरागविवर्धिनी ।
यज्ञभोक्त्री यज्ञभागा सौभाग्य वरदायिनी ॥
व्यापिनी दशदिग्वाहुर्दिगन्ता वलिदायिनी ।
कृपा विश्वेश्वरी स्वङ्गा शताक्षी कामदेवता ॥
कामचारप्रियाकामा कामाचार परायणा ।
चिकित्सा वेदविद्या च वैद्यमातामहौषधिः ॥
महौषधि रसप्रीता विकराला कलातिगा ।
मेघशक्तिर्महावृष्टिः सुवृष्टिः शिव शर्मदा ॥
रुद्राणी रुद्रवदना रुद्रपूज्यान्नपूर्णिका ।
अन्नदान रसान्नाद्या तृप्तिदाभोजनप्रिया ॥

कर्मपाशप्रदा पङ्क्ति: पाकशक्ति: पचिक्रिया ।
सुपक्वफलदा वाञ्छा वाञ्छाधिक फलप्रदा ॥
सर्वयन्त्रमयीपूर्णा सर्वभूताश्रयाम्बिका ।
ब्राह्मणी ब्रह्मशक्तिश्च चराचरविभाविनी ॥
चराचरगतिर्जैत्री लक्षालक्षेश्वरार्द्धहृत् ।
गुहशक्तिर्गणेट् शक्तिर्नारसिंही सहस्रदृक् ॥
सर्पमालोत्तरीया च सर्पसर्वाङ्गभूषणा ।
वाराही च सहस्राक्षी कूर्मशक्ति: शुभालया ॥
शेषरूपा शेषशक्ति: शेषपर्यङ्कशायिनी ।
वराहदंष्ट्रा वलिधि: कामधी: काममोहिनी ॥
मायिनी चित्तसदना कामिकामप्रवर्द्धिनी ।
सर्वलक्षणसम्पूर्णा सर्वालक्षणनाशिनी ॥
नादरूपा बिन्दुरूपा कृतंकर्मफलप्रदा ।
ध्रुवशक्ति: ध्रुवारोहा ध्रुवाटोपा ध्रुवार्थदा ॥
ध्रुवाकाराग्निहोत्राढ्या ध्रुवाचाराध्रुवस्थिति: ।
ध्रुवाध्रुवमयीध्रौव्या चिद्रूपानन्दरूपिणी ॥
हृद्रूपाबगलाकृष्णा नीलग्रीवा कुधीहरा ।
पवित्रदृष्टि: पावित्र्यकारिणी ऋषिवत्सला ॥
शिशूत्सङ्गधरासङ्गा संगरागप्रवर्धिनी ।
नि:सङ्गा संगबहुला चतुराश्रमवासिनी ॥
चतुर्वर्ण परिष्वङ्गा चतुर्वर्ण वहिस्थिता ।
निराश्रया रागवती रागिमानससंश्रया ॥
ब्राह्मणी राजदुहिता वैश्या शूद्रा परासुरा ।
गृहाश्रमसमासीना गृहधर्मनिरूपिणी ॥
गृहधर्मा विषादघ्नी ब्रह्मचर्यनिषेविणी ।
वानप्रस्थाश्रमस्था च यतिधर्मा स्फुरत्तनु: ॥
संस्थिति: प्रलया सृष्टि: सर्गस्थित्यन्तखेलकृत् ।
ज्ञान शक्ति: क्रियाशक्ति छायाशक्तिरपूर्वकृत् ॥

नाना वाद विशेषज्ञा नाना वाद निरङ्कुता ।
शून्यवाद निराकारा धर्मवाद निरूपिणी ।।
नवचण्डी क्रिया हेतुः संकल्पाकल्पनातिगा ।
निर्विकल्पा विकल्पाद्या संकल्पाकल्पभूरुहा ।।
सृष्टिघ्नी च स्थितिघ्नी च विनाशघ्नी त्रिरूपभृत् ।
अयोध्या द्वारका काशी मथुराकाञ्च्यवन्तिका ।।
विशोका शोकमार्तण्डी पाञ्चाली शोकनाशिनी ।
शम नियम शक्तिश्च धर्मशक्तिर्जयध्वजा ।।
मुक्तिः कुण्डलिनी भुक्तिर्विषदृष्टिः समेक्षणा ।
कृपेक्षणा कृपार्द्राङ्गी कृपार्चिता कृपाश्रुतिः ।।
महापुराद्रिनिलया महापुरकृतस्थितिः ।
अज्ञानकल्पनानंता प्रपंचकलनातिगा ।।
साम्यदृष्टिर्देहपुष्टिः कृतसृष्टिर्हृताखिला ।
वेणुपुण्य परीपाकाऽयोनिजा वह्निसंभवा ।।
महापुर सुखासीना डमड्डमरुदर्पिता ।
महापुर महादेवी डमरुप्रीतिवल्गिता ।।
भद्रकाली पितृशक्तिहर्यालसाभुवनेश्वरी ।
गायत्री च चतुर्वक्त्रा त्रिपुरा वीरवन्दिता ।।
यमाम्बा त्रिगुणानन्दा कैवल्यपददायिनी ।
वडवा सदया भूस्था शाक्तसर्गप्रवर्त्तिनी ।।
इन्द्रादि देवजननी एलाम्बा कोलरूपिणी ।
कुंभदर्पहरा दोला दोलाक्रीडन लालसा ।।
शीतला विष्णुमाया च चतुर्वक्त्र नमस्कृता ।
मातंगी विष्णुजननी प्रेतासननिवासिनी ।।
गरुत्मद्गमनानीला ब्रह्मास्त्रा ब्रह्मभूषिता ।
सिद्धिः पाशुपतास्त्रा च नीलेन्दीवरलोचना ।।
रुक्माशंकरजननी कर्मनाशा च शाम्भवी ।
त्रिगा वामन शक्तिश्च हिरण्यगर्भभूसुरा ।।

वाग्वादिनी च वर्णा च शंकरार्द्धशरीरिणी ।
दारुणा मोहरात्रिश्च भ्रमादिगणरूपिणी ॥
दीपिका क्रीडवरदा मोहिनी गरलाशना ।
कपर्दाचित सर्वाङ्गी कपर्दाभरणप्रिया ॥
सावित्री भैरवीविघ्ना पीतापीताम्बरप्रभुः ।
दशवक्त्रानवद्याङ्गी त्रिशल्लोचनभूषिता ॥
दशांघ्रिर्दशदोर्दण्डा स्फुरद्दंष्ट्रातिभीषणा ।
कपूरकान्तिवदना नीलबाहुरनुत्तमा ॥
ब्रह्मगेया मुनिध्येया ह्लींकारा कामविग्रहा ।
षड्वीजा नववीजा च नवाक्षर तनुःखगा ॥
दशार्णा द्वादशार्णाढ्या षोडशार्णाविबीजगा ।
माला मन्त्रमयी जय्या सर्वबीजैक देवता ॥
जपमाला च जयदा जपविघ्नविनाशिनी ।
जपकर्त्री जपस्तोत्रा मंत्रयंत्र फलप्रदा ॥
मंत्रावरणरूपैका यंत्रावरण देवता ।
पद्मिनी पद्मपत्राक्षी शमी यज्ञांगदेवता ॥
यज्ञसिद्धिः सहस्राक्षी सहस्राक्षपदप्रदा ।
रेणुवंशावताराढ्या महिषान्तकरी समित् ॥
ऋग्वेदा च यजुर्वेदा सामवेदा त्रयीपरा ।
अभिचारप्रियाथर्वा पंचतन्त्राधिदेवता ॥
अभिचारक्रिया शान्तिः शांतिमन्त्राधिदेवता ।
अभिचारोपशमनी सर्वानन्दविधायिनी ॥
अथर्वपाठसंपन्ना लेखनी लेखकस्थिता ।
भूमलेख्या वर्णशक्तिः सर्वशक्तिः प्रसिद्धिदा ॥
कीर्तिकामा कलाकामा कामाक्षी सर्वमंगला ।
शूलेश्वरी कुशूलघ्नी चिताशोकविनाशिनी ॥
चितादिदेवताभूतनायका नलकूबरी ।
करालीत्यूर्ध्वकेशी च श्रीधरी च विनायकी ॥

कामेश्वरी च कौवेरी पद्मावत्यभिधागतिः ।
ज्वालामुखी च कौवेरी विजया मेघवाहना ॥
महावला महोत्साहा महाभयनिवारिणी ।
कामिनी शांकरी काष्ठा सहस्रभुजनिग्रहा ॥
प्रभा प्रभाकरी भाषा सप्ताश्वरथसंस्थिता ।
अलकापुरसंस्थाना मृडानी विंध्यनिश्चला ॥
हिमाचलकृतक्रीडा पीडापापनिवारिणी ।
अर्धमात्राक्षरा सन्ध्या त्रिमात्राभारती धृतिः ॥
वेदमातावेदगर्भा कौशिकी त्र्यम्बकास्वरा ।
अम्बलिका क्षुधा तृष्णा धूम्रारौद्रा दुरत्यया ॥
पानपात्रकरा जातिः श्रद्धावार्ताचितास्थिता ।
दुर्गाणी रक्तचामुण्डावृतिः सोमावतंसिनी ॥
शरण्यार्या दुर्गापरा सारा ज्योस्त्ना महास्मृतिः ।
जगत्प्रतिष्ठा कल्याणी छाया तुष्टिश्च तामसी ॥
तृष्णा वाग्धीश्च नद्धा च गदिनी चक्रधारिणी ।
लज्जा सहस्रनयना महिषासुरमर्दिनी ॥
भीमा भद्राभगवती नवदुर्गाऽपराजिता ।
मेघाष्टादश दोर्दण्डा दुर्गा कात्यायनीरतिः ॥
सर्वतः पाणिपादोरुर्भ्रामरी चन्द्ररूपिणी ।
इन्द्राणी च महामारी सर्वतोक्षिशिरोमुखा ॥
सप्ताधिसंश्रया सत्ता सप्तद्वीपाब्धिमेखला ।
सूर्यदीप्तिर्वज्रपंक्तिः पानोन्मत्ता च पिंगला ॥
सर्वज्ञा विश्वमाता च भक्तानुग्रहकारिणी ।
विश्वप्रिया प्राणशक्तिरनंतगुणनामधीः ॥
सर्वकल्याणनिलया शारदा त्र्यम्बिका सुधा ॥

### श्रीशंकर उवाच

दिव्यं नाम सहस्रं ते रेणुकाया मयेरितम् ।
सर्वकामसमृध्यर्थमनेन भजषण्मुख ।।
भुक्तिदोमुक्तिदश्चापि भजतां कल्पपादपः ।
जयप्रदो विशेषेण नानेन सदृशो मनुः ।।
पुरश्चरणमुद्दिष्टं सहस्रं नवकं शुभम् ।
विजयार्थं विशेषेण प्रयोगं साधयेत्ततः ।।
हस्तयोर्भाजनं कृत्वा प्रसादं याचयेन्मुहुः ।
लब्ध प्रसादो भक्तेभ्यश्चिन्तयेद्धृदि रेणुकाम् ।।
भक्तितो योगिनी वृन्दं पूजयेत्तोषयेन्मुदा ।
तत्पात्रं पूरयेदन्नैः पूजयित्वोपचारकैः ।।
शृङ्गिनादं समाकर्ण्य प्रार्थयेदुदयाशिषम् ।
सर्वेभ्यश्चाशिषोलब्ध्वा भुञ्जीत सहबान्धवैः ।।
नाना जाति भवान् भक्तान् प्रीयतां रेणुकेति च ।
उत्सर्गादि प्रदानेन तोषयेच्चमुहुर्मुहुः ।।
दीपकाडमरुध्वानैरुदयोद्दाम कीर्तनैः ।
गोदोह समये कुर्याद्गोदोहजमहोत्सवम् ।।
जगदम्बामयं पश्यन् सकलं दृष्टिगोचरम् ।
दीपिकाडमरूत्साहं भक्तैः सहनिशांनयेत् ।।
अवर्षणेधराकम्पे संक्षोभे सागरस्य च ।
आवर्तन सहस्रेण निश्चिते जायते शुभम् ।।
दुष्टोत्पाते महाघोरे संकटे दुरतिक्रमे ।
अयुतावर्तनान्नूनमसाध्यमपि साधयेत् ।।
निशीथे वा प्रदोषे वा जगदम्बालये शुचिः ।
नवरात्रं जपेद्यस्तु प्रत्यहं नववारकम् ।।
नामभिः पूजनं होमं प्रत्ययं कुरुतेवृती ।
प्रसन्नास्मै महामाया प्रत्यक्षं भवति ध्रुवम् ।।

त्रिवारं नियतं जप्त्वा षण्मासं व्रतवान् शुचि: ।
दारिद्र्यार्णवमुत्तीर्य विपुलां श्रियमाप्नुयात् ॥
विशेष साधनं कुर्यात् पुरश्चर्यां पुन: सुधी: ।
साधयेत् सकलान् कामान् सत्वरं नात्रसंशय: ॥
पुष्पाज्य पायसतिलैर्हरिद्रा — मधुचन्दनै: ।
नाना परिमलद्रव्यैर्भक्तियुक्तोयजेन्मुदा ॥
इदं पठति यो भक्त्या श्रृणुयाद्वापिनित्यश: ।
निर्विघ्नं लभतेऽभीष्टं जीवेच्चशरदांशतम् ॥
शुक्लपक्षेऽथवा कृष्णे भूताध: षष्ठिकादिनात् ।
साधक: साङ्ग विधिना साधयेत् स्तोत्र मन्त्रवित् ॥
इषे शुक्लनवम्यन्तमारभ्य प्रतिपत्तिथिम् ।
नवरात्रोक्त विधिना कलशंपूजयेन्मुदा ॥
संकटे सत्वरे कृत्ये विधिनावर्तयेत् स्थितिम् ।
प्राप्नोति वाञ्छितं सद्य: सर्वविघ्नविनाशकृत् ॥
वृतदीपद्वयंकृत्वा दक्षिणोत्तरभागयो: ।
नानाभोगोपचारैश्च तोषयेज्जगदम्बिकाम् ॥
कुंकुमागरुकस्तूरी चन्दनादिभिरर्चयेत् ।
कुमारींपूजयेद्भक्त्या ब्राह्मणांश्च सुवासिनीम् ॥
षड्रसै: स्वादुपक्वान्नैर्भोजयेच्च चतुर्विधै: ।
शक्तितो दक्षिणा दद्याद्वासोधान्यं गवादिकम् ॥
वित्तशाठ्यं न कुर्वीत सर्व कामसमृद्धये ।
प्रणमेत् प्रणमेद्भक्त्या प्रोच्यतामुदयोस्त्वति: ॥
भूषितो मंगलस्नानै: स्वालेप्याम्बरमाल्यवान् ।
विभूष्याङ्गं कपर्दैश्च प्रज्वाल्य घृतदीपिकाम् ॥
यद्यदारभ्यते कार्यं तदादौ च समापने ।
सम्पूज्याम्बां कुमारींश्च पूजयेज्जपपूर्वकम् ॥
भूताष्टम्बां नवम्यां च भौमे च नियत: पठेत् ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

भूतारक्षः पिशाचाद्या वैरिणो दस्यवोऽपि च ।
पठ्यतेऽनुदिनं यत्र तद्गृहं नो विशन्ति च ॥
अब्धि संचरणे पोते लंघने गिरिरोहणे ।
चित्तक्षोभेप्रसादे च विषादे वा पठेदिदम् ॥
दुःस्वप्न दर्शने मार्गे विड्वरेकलहागमे ।
यात्राकाले पठेदेतत् सर्वमांगलिकागमे ॥
निष्कामो वा सकामो वा पुरुषार्थप्रदं यतः ।
त्रैवर्णिकः पठेदेदितरः पाठयेत् सदा ॥
सौभाग्यं लभतेनारी कन्या सर्वोत्तमं वरम् ।
मृत्वत्सा लभेत्पुण्यमायुष्मत्संततिं शुभाम् ॥
असूतिर्लभते सूतिं सुसूतिं कष्ट सूतिका ।
उदासीना लभेत्प्रीतिं पतिबालप्रियङ्करी ॥
न वैधव्यमवाप्नोति न सपत्नीं लभेत् क्वचित् ।
सुरूपा सुभगा धन्या विरहंनाप्नुयात्क्वचित् ॥
च्यवद्गर्भवती या च दृढगर्भवतीभवेत् ।
वित्तापत्यपरीवारा पतिमण्डित विग्रहा ॥
सहस्रनामकं स्तोत्रं पठ्यते यत्रवेश्मनि ।
ग्रहाबालग्रहाः पीडां नैव कुर्वन्ति कर्हिचित् ॥
यद् गृहे पूजितं ह्येतत् पुस्तकं वा सुभक्तितः ।
शक्तितो हवनं कुर्यात् विघ्नस्तत्र विनश्यति ॥
गर्भिणी स्त्रावयेन्नित्यं गर्भदोषान्निवर्तते ।
सूतिकायत्ने प्रोक्तं सूतिका बाल सौख्यदम् ॥
सर्व मन्त्राधिकमिदं भक्त्या यः सर्वदा पठेत् ।
श्रावयेत् पाठयेद्वापि सर्वत्र लभते जयम् ॥
पुस्तकानि प्रदेयानि विप्रेभ्योनवभक्तितः ।
सोपचाराणि विधिना रेणुका तुष्टिहेतवे ॥
पुत्रकामी शुभान्पुत्रान् धनार्थी विपुलं धनम् ।
कन्यार्थी लभते कन्यां कुलशीलादि मण्डिताम् ॥

विद्याकामो लभेद्विद्यां कवित्वं कविताप्रियः ।
प्रज्ञातिशयमासाद्य समर्थो ग्रन्थधारणे ।।
मुच्यते निगडाबद्ध स्खलद्गीः स्पष्टवाग्भवेत् ।
कामुकः काममाप्नोति भूपालं वशमानयेत् ।।
कुष्टापस्मार रहितो ज्वररोगविवर्जितः ।
रोगी रोग विनिर्मुक्तः शत्रुसंघाज्जयो भवेत् ।।
शीतलो जायते वह्निर्विषंस्यादमृतोपमम् ।
शस्त्राण्युत्पलतां यान्ति पठनादस्य भक्तितः ।।
अन्धो दृष्टिमवाप्नोति बधिरः श्रुतिमान्भवेत् ।
मूको वाचालतामेति रेणुकायाः प्रसादतः ।।
रेणुकेत्येकनामेदं धर्मार्थ काम मोक्षदम् ।
फलं नाम सहस्रस्य समर्थो वक्तुमस्तिकः ।।
रेणुकास्मरणान्नूनं विषंनाक्रमते तनौ ।
सर्व पीडोपशान्तिश्च सकलार्थ सुखोदयः ।।
नारायणः श्रिया युक्तः सावित्री सहितोविधिः ।
अहं भवानी सहितो रेणुकार्चनतोऽर्चिता ।।
सर्व यज्ञफलं तस्य पारायण फलंतथा ।
साङ्गयोगफलं तस्य रेणुका येनपूजिता ।।
उच्यते बाहुमुद्धृत्य बहुनोक्तेन षण्मुख ।
सेव्यते रेणुका यैस्ते सेव्यन्ते त्रिदशैरपि ।।

**इति श्रीपद्मपुराणे मायोपाख्याने रेणुकाप्रस्तावे रेणुकाप्रकृतिभावे शंकरषण्मुखसंवादे शंकरप्रोक्तं रेणुकासहस्रनामस्तोत्रं सम्पूर्णम् ।**

# श्रीरेणुका अष्टोत्तरशतनाम स्तोत्रम्

॥ ॐ श्रीगणेशाय नमः ॥

॥ श्री भगवत्यै रेणुकाजगदम्बायै नमोनमः ॥

ॐ अस्य श्रीरेणुका देव्यष्टोत्तरशत नामावलि-स्तोत्रमहामन्त्रस्य शाण्डिल्य महर्षिः अनुष्टुप् छन्दः श्री जगदम्बा रेणुकादेवता ॐ बीजं नमः शक्तिः ॐ महादेवीति कीलकं श्री जगदम्बा रेणुका प्रसाद सिद्धयर्थं सर्व पापक्षय द्वारा श्रीजगदम्बारेणुकाप्रीत्यर्थं सर्वाभीष्ट फल प्राप्त्यर्थं च जपे विनियोगः ।

**अथ करन्यासः**

ॐ ह्रां रेणुकायै नमः अङ्गुष्ठाभ्यां नमः ।
ॐ ह्रीं राममात्रे नमः तर्जनीभ्यां नमः ।
ॐ ह्रूं महापुरुषवासिन्यै नमः मध्यमाभ्यां नमः ।
ॐ ह्रैं एकवीरायै नमः अनामिकाभ्यां नमः ।
ॐ ह्रौं कालरात्र्यै नमः कनिष्ठिकाभ्यां नमः ।
ॐ ह्रः एककाल्यै नमः करतलकरपृष्ठाभ्यां नमः ।

### अथ षडङ्गन्यासः

ॐ ह्रां रेणुकायै नमः हृदयाय नमः ।
ॐ ह्रीं राममात्रे नमः शिरसे स्वाहा ।
ॐ ह्रूं महापुरुषवासिन्यै नमः शिखायै वषट् ।
ॐ ह्रैं एकवीरायै नमः कवचाय हुं ।
ॐ ह्रौं कालरात्र्यै नमः नेत्रत्रयाय वौषट् ।
ॐ ह्रः एककाल्यै नमः अस्त्राय फट् ।

### अथ देहन्यासः

ॐ ह्रां रेणुकायै नमः शिरसे स्वाहा ।
ॐ ह्रीं राममात्रे नमः मुखे ।
ॐ ह्रूं महापुरुषवासिन्यै नमः हृदये ।
ॐ ह्रैं एकवीरायै नमः गुह्ये ।
ॐ ह्रौं कालरात्र्यै नमः पादयोः ।
ॐ ह्रः एककाल्यै नमः सर्वाङ्गे ।

ॐ भूर्भुवः स्वः इति दिग्बन्धः ।

### ध्यानम्

ध्यायेन्नित्यमपूर्ववेशललितां कन्दर्प लावण्यदां ।
देवीं देवगणैरुपास्यचरणां कारुण्यरत्नाकराम् ॥
लीलाविग्रहणीं विराजितभुजां सच्चन्द्रहासादिभि- ।
र्भक्तानन्दविधायिनीं प्रमुदितां नित्योत्सवां रेणुकाम् ॥

ॐ

जगदम्बा जगद्वन्द्या महाशक्तिर्महेश्वरी ।
महादेवी महाकाली महालक्ष्मीः सरस्वती ॥
महावीरा महारात्रिः कालरात्रिश्च कालिका ।
सिद्धविद्या राममाता शिवा शान्ता ऋषिप्रिया ॥

नारायणी जगन्माता जगद्बीजा जगत्प्रभा ।
चन्द्रिका चन्द्रचूडाच चन्द्रायुधधराशुभा ।।
भ्रमराम्बा तथानन्दा रेणुका मृत्युनाशिनी ।
दुर्गमा दुर्लभा गौरी दुर्गा भर्गकुटुम्बिनी ।।
कात्यायनी महामाता रुद्राणी चाम्बिका सती ।
कल्पवृक्षा कामधेनुः चिन्तामणिरूपधारिणी ।।
सिद्धाचलवासिनी च सिद्धवृन्दसुशोभिनी ।
ज्वालामुखी ज्वलत्कान्ता ज्वालाप्रज्वलरूपिणी ।।
अजा पिनाकिनी भद्रा विजया विजयोत्सवा ।
कुष्ठरोगहरा दीप्ता दुष्टासुरगर्वमर्दिनी ।।
सिद्धिदा बुद्धिदा शुद्धा नित्यानित्यतपःप्रिया ।
निराधारा निराकारा निर्माया च शुभप्रदा ।।
अपर्णा चान्नपूर्णा च पूर्णचन्द्रनिभानना ।
कृपाकरा खड्गहस्ता छिन्नहस्ता चिदम्बरा ।।
चामुण्डी चण्डिकानन्ता रत्नाभरणभूषिता ।
विशालाक्षी च कामाक्षी मीनाक्षी मोक्षदायिनी ।।
सावित्री चैव सौमित्री सुधा सद्भक्तरक्षिणी ।
शान्तिश्च शान्त्यतीता च शान्तातीततरा तथा ।।
शाकंभरी तथा सूक्ष्मा शांकरी परमेश्वरी ।
ईशानी नैर्ऋती सौम्या माहेन्द्री वारुणी तथा ।।
जमदग्नितमोहन्त्री धर्मार्थकाममोक्षदा ।
कामदा कामजननी मातृका सूर्यकान्तिनी ।।
मन्त्रसिद्धिर्महातेजा मातृमण्डलवल्लभा ।
लोकप्रिया रेणुतनया भवानी रौद्ररूपिणी ।।

तुष्टिदा पुष्टिदा चैव शाम्भवी सर्वमङ्गला ।
एतदष्टोत्तरशत नामस्तोत्रं पठेत् सदा ।।

सर्वं सम्पत्करं दिव्यं सर्वाभीष्ट फलप्रदम् ।
अष्टसिद्धियुतं चैव सर्वपापनिवारणम् ।।

**दिग्बन्धन शान्तिमन्त्राः**

**इन्द्रादि दिग्पालकाः स्वस्वस्थानेषु स्थिरी भवन्तु ।**
**ॐ शान्तिः शान्तिः शान्तिः ।**

**इति श्री शाण्डिल्य महर्षि विरचित**
**श्रीरेणुकादेव्यअष्टोत्तरशत नामावलिः सम्पूर्णा ।**

# रेणुका खड्गमाला मन्त्रः

॥ श्री रेणुकायै नमः ॥

ॐ रेणुका कुण्डली वक्रा कुण्डल्यपि महाकुला ।
लीयमाना प्रकर्त्तव्या वर्णोच्चारेण शंकर ॥
लीयमाना विजानीहि निरालम्बा महापदा ॥
अप्रमेया विरूपाक्षी हुंकार कुण्डली शुभा ॥
आदिक्षान्तं समुच्चार्य प्रणवं चान्तरे न्यसेत् ॥
देहे विन्यस्य बीजानि रक्ष रक्षेति रेणुके ॥
रक्ष मां भार्गवि देवि रक्ष रामप्रसूर्मम ॥
जमदग्नि प्रिये रक्षास्मदीयमिदंवपुः ॥

ॐ श्रीं ह्रीं क्रों ऐं वज्रवैरोचनीये समयिनी छिन्नमस्तके सकलसुरासुरवन्दिते महाभूपालमौलि-मालार्चितचरणकमले विकटदन्तच्छटाटोपनिवारिणि मदीयं शरीरं रक्ष रक्ष परमेश्वरि हुं फट् स्वाहा । ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । कमलमालाभरणभूषिते महाकौलिनि महाब्रह्मवादिनि महाऋषिप्रिये वरदायिनि महाभोगप्रदे अस्मदीयं शरीरं वज्रमयं कुरु कुरु दुर्जनान् हन हन महीपालान् क्षोभय क्षोभय परचक्रं भञ्जय भञ्जय जयङ्करि स्मरणमात्रगामिनी त्रैलोक्यस्वामिनि

क्षमलवरयूं रमलवरयूं भमलवरयूं क्षमलवरयूं श्री भार्गवि प्रसीद प्रसीद स्वाहा ।

इति सर्वाङ्गे व्यापकं न्यसेत् ।

एषा विद्या महाविद्या समया बलवत्तरा ।
अतिवीर्यतरा तीव्रा सूर्यकोटिसमप्रभा ॥
कुलाङ्गना कुलं सर्वं मदीयं परमेश्वरि ।
देवी रक्षतु सर्वाङ्गं दिव्याङ्गी भोगदायिनी ॥
रक्ष रक्ष महादेवि शरीरं परमेश्वरि ।
मदीयं परमानन्दे आपादतलमस्तकम् ॥
हुंकारं च ततः कुर्यात पूजयेद् भुविमण्डले ।
पूजान्ते वामहस्तेन ह्रींकारं च त्रिधा जपेत् ।
पश्चात् रेणुका मन्त्रेण मूलमन्त्रेण शाङ्करि ।
चक्रावरण देवीनां रेणुकाया महौजसः ॥
एकत्र गणनारूप मन्त्रो मन्त्रार्थ गोचरः ।
मालामन्त्र विधानेन क्रमणोच्चारणे भवेत् ।
तस्मात् खड्गवरं मन्त्रं स्वतनौ रक्षणं महत् ।

## ध्यानम्

सिद्धैरर्चितसुन्दरा श्रुतिमती रामप्रसूर्भार्गवी ।
ज्ञापर्णाऽदिति रेणुका, ऋषिप्रिया श्रीमूलपीठे स्थिता ॥
पञ्चार्णैरभिपूजिता श्रुतिधरा खड्गाभिधा मालया ।
सा मे रक्षतु तत्परार्चनविधौ आवर्तने भाविता ॥
पूर्णानन्दमयी देवी मूलपीठनिवासिनी ।
परशुराम प्रसूर्माता खड्गाभिदाऽभिरक्षतु ॥

ॐ अस्य श्री रेणुका शुद्ध खड्गमाला महामन्त्रस्य वर्णादित्यऋषिः गायत्री छन्दः श्री रेणुका देवता ऐं बीजं ह्रीं शक्तिः क्रौं कीलकं ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः । ध्यायेन्नित्यमितिध्यानम् ।

**तादृशं खड्गमाप्नोति येन हस्तस्थितेनवै ।**
**अष्टादश महाद्वीप सम्राड्भोक्ता भविष्यति ॥**

ॐ श्रीं ह्रीं क्रों ऐं ॐ नमः श्री सुन्दरि भार्गवि हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेव्यस्त्रदेवि पञ्चदशतिथि नित्ये परमेश्वर परमेश्वरि मित्रीशमयि षष्ठीशमयि उड्डीशमयि चर्यानाथमयि श्री रेणुकामयि जमदग्निमयि कालतापनमयि धर्माचारमयि मुक्तकेशीश्वरमयि दीपकलानाथमयि शिवकलाकश्यपमयि इन्द्रसुराधिप सपरिवार वज्रायुधमयि अग्नितेजोऽधिप सपरिवार शक्त्यायुधमयि यमनियमाधिप सपरिवार दण्डायुधमयि नैऋत्यरक्षाधिप सपरिवार खड्गायुधमयि वरुण जलाधिप सपरिवार पाशायुधमयि वायुप्राणाधिप सपरिवार कुशायुधमयि कुबेरयक्षाधिप सपरिवार गदायुधमयि शंकरभूताधिप सपरिवार शूलायुधमयि विरञ्चिजीवाधिपसपरिवार दर्भायुधमयि विष्णुविश्वाधिप सपरिवार चक्रायुधमयि भूपुरप्रथमरेखे ऐं उत्पत्तिसत्वगुणकारणमयि मध्यरेखे श्रीं स्थिति रजोगुण कारणमयि अन्त्यरेखे ह्रीं लय तमोगुण कारणमयि त्रैलोक्य मोहनचक्र स्वामिनि प्रकटयोगिनि स्तम्भनमुद्रे ।

ब्रह्माणि कौमारि वाराहि शाङ्करि इन्द्राणि कंकालि करालि कालि महाकालि चामुण्डे ज्वालामुखि कामाख्ये कपालिनि भद्रकालि दुर्गे अम्बिके ललिते गौरि सुमंगले रोहिणि कपिले शूलकरे कुण्डलिनि त्रिपुरे कुरुकुल्ले भैरवि भद्रे चन्द्रावति नारसिंहि निरञ्जने हेमकान्ते प्रेतासने ईशानि वैश्वानरि वैष्णवि विनायकि यमघण्टे हरसिद्धे सरस्वति तोतुले वन्दिनि शंखिनि पद्मिनि चित्रिणि वारुणि चण्डि वनदेवि यमभगिनि सूर्यपुत्रि सुशीतले कृष्ण वाराहि रक्ताक्षि कालरात्रे आकाशि श्रेष्ठिनि

जये विजये धूमावति वागीश्वरि कात्यायिनि अग्निहोत्रि चक्रेश्वरि महाविद्ये ईश्वरि सर्वाशापरिपूरक चक्रस्वामिनि गुप्तयोगिनि विद्ये ह्लीं पुष्टे प्रज्ञे सिनीवालि कुहु रुद्रे वीर्ये प्रभे नन्दे पोषिणि ऋद्धिदे कालरात्रे महारात्रे भद्रकालि कपर्दिनि विवृते दण्डिनि मुण्डिनि सेन्दुखण्डे शिखण्डिनि निशुम्भ शुम्भ मथिनि महिषासुरमर्दिनि इन्द्राणि रुद्राणि शंकरार्द्ध-शरीरिणि नारि नारायणि त्रिशूलिनि पालिनि अम्बिके ह्लादिनि सर्व संक्षोभिणचक्रस्वामिनि गुप्ततरयोगिनि ।

गौरि पद्मे शचि मेधे सावित्रि विजये जये देवसेने-स्वधे स्वाहे मातः लोकमातः धृते पुष्टे तुष्टे कुलदैवते सर्वसौभाग्यदायक चक्रस्वामिनि सम्प्रदाययोगिनि । असिताङ्ग भैरवमयि रुरुभैरवमयि चण्डभैरवमयि क्रोधभैरवमयि उन्मत्तभैरवमयि भीषणभैरवमयि संहार-भैरवमयि ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि इन्द्राणि चामुण्डे महालक्ष्मि सर्वरक्षाकरचक्रस्वामिनि निगर्भ योगिनि चतुरस्र मुद्रे ।

जये विजये दुर्गे भद्रकालि क्षेमकरि नित्ये सर्वार्थ-साधक चक्रस्वामिनि कुलोत्तीर्णयोगिनि मत्स्यमुद्रे शंखनिध्यम्बे पद्मनिध्यम्बे क्लां मातृपुरनिवासिनि हृदयशक्ति । क्ली मूलपीठाश्रिते स्वाहा । शिरो शक्तिः । क्लं रेणागिरिप्रिये वषट् शिखा शक्तिः । क्लैं एकवीरे हुं कवच शक्तिः । क्लौं भार्गवि वीरे वौषट् नेत्र शक्तिः । क्लः रेणुके फट् अस्त्रशक्तिः । सर्व रक्षाकर चक्रस्वामिनि निगर्भ योगिनि ।

डां डाकिनि त्वग्रक्षिणि चतुःषष्ठिलक्षकोटि योगिनी-स्वामिनीनायिके शां शाकिनि असृग्रक्षिणि द्वात्रिंशल्लक्ष कोटियोगिनीस्वामिनीनायिके । लां लाकिनि मांस रक्षिणिषोडश लक्ष कोटि योगिनी स्वामिनीनायिके ।

कां काकिनि मेदोरक्षिण्यष्टलक्षकोटियोगिनि स्वामिनीनायिके। सां साकिनि अस्थिरक्षिणि चतुर्लक्षकोटियोगिनि स्वामिनिनायिके। हां हाकिनि मज्जारक्षिणि द्विलक्षकोटियोगिनी स्वामिनिनायिके। शां शाकिनि शुक्ररक्षिणि एकलक्षकोटियोगिनि स्वामिनिनायिके सर्वरोगहरचक्रस्वामिनि सर्वरहस्ययोगिनि गोमुखमुद्रे। क्लीं टंकहस्ते परशुरामजननि उड्यानपीठे इच्छाशक्तिः जालन्धरपीठे ज्ञानशक्तिः कामरूपपीठे क्रियाशक्तिः सर्वसिद्धिप्रद चक्रस्वामिनि अतिरहस्ययोगिनि योनिमुद्रे। श्रीरेणुके बिन्दुचक्रनिवासिनि परापरातिरहस्ययोगिनि श्रीमूलपीठे श्रीमूलपीठेशि श्रीमूलपीठसुन्दरि श्रीमूलपीठनिवासिनि श्रीमूलपीठश्रि श्रीमूलपीठमालिनि श्रीमूलपीठसिद्धे श्रीमूलपीठाम्बे श्रीमहामूलपीठसुन्दरि श्रीमहामाहेश्वरि महामहाराज्ञि महामहाशक्ते महामहागुप्ते महामहाज्ञप्ते महामहानन्दे महामहा स्पन्दे महामहाशये महामहाश्रीमूलपीठचक्रनगरस्वामिनि साम्राज्ञि नमस्ते नमस्ते नमस्ते स्वाहा ऐं क्रों ह्रीं श्रीं ॐ।

ॐ श्रीं ह्रीं क्रों ऐं समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलिनि गर्भरहस्यातिरहस्य परापररहस्ययोगिनि श्रीराजराजेश्वरि श्रीरेणुकापरमेश्वरि श्रीमूलपीठेश्वरि श्रीपादुकां पूजयामि नमः। पुष्पाञ्जलिं निवेद्य मूलेन न्यासं विधाय मानसोपचारैः पूजयेत्।

## *अथ मालामन्त्रः*



मालामन्त्रो महादेव्याः सर्वसिद्धिप्रदायकः ।
एकत्रिंशत् सहस्रार्णः त्रिलोकी मोहनक्षमः ।।
एषा विद्यामहासिद्धिदायिनी स्मृतिमात्रतः ।
अग्निवातमहाक्षोभे राजराष्ट्रविपप्लवे ।।
लुण्ठने तस्करभये संग्रामे सलिलप्लवे ।
समुद्रायाम विक्षोभे भूतप्रेतादिजे भये ।।
अपस्मारज्वरव्याधिमृत्यून्मादादिजे भये ।
डाकिनी पूतनायक्ष रक्षः कूष्माण्डजे भये ।।
मित्रभेदे ग्रहभये व्यसने चाभिचारिके ।
अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेद्बुधः ।।
भूर्भुवः स्वः समुच्चार्य दशषट् च स्वरं जपेत् ।
पंच त्रिशत् व्यञ्जनानि पश्चात् मालामन्त्रं जपेत् ।।
सर्वोपद्रव निर्मुक्तः साक्षात् शिवमयो भवेत् ।
आपत्काले नित्यपूजां विस्तरात्कर्तुमक्षमः ।।
एकावर्तनमात्रेण चक्रपूजाफलं लभेत् ।
नवावरण देवीनां रेणुकाया महौजसः ।।

एकत्र गणनारूपो यन्त्रमन्त्रार्थगोचरः ।
सर्वागमरहस्यार्थः स्मरणात्पापनाशिनी ॥
नरेन्द्राणां च नारीणां सर्वदेव वशंकरी ।
रेणुकाया महेशान्याः मालाविद्या महीयसी ॥
अणिमादिगणैश्वर्यैः रञ्जनं पापभञ्जनम् ।
तत्तथावरणस्थायी देवतावृन्दमन्त्रजम् ॥
मालामन्त्रमिदं गुह्यं परंधाम प्रकीर्तितम् ।
इदं स्तोत्रं महादेव्याः सर्वलोकविमोहनम् ॥
सर्व सौख्यप्रदं नृणां सर्व सौभाग्य दायकम् ॥

**॥ इति श्रीरेणुकाखड्गमाला सम्पूर्णा ॥**



# रेणुका मालामन्त्रः

अस्य श्रीरेणुकामालामन्त्रस्य भार्गव ऋषिरनुष्टुप्-छन्दः रेणुकाम्बादेवता क्लां बीजं क्लीं शक्तिः क्लूं कीलकं रेणुकाप्रसाद सिद्धचर्थे जपे विनियोगः। क्लामित्यादि करहृदयन्यासः। लोकत्रयमिति दिग्बन्धः।

**ध्यानम्**

**मध्ये बद्धमयूरपिच्छनिकरां श्यामां प्रबालाधरां।**
**गुञ्जाहारधरां धनुःशरकरां नीलाम्बराऽम्बराम्॥**
**शृङ्गीवादनतत्परां सुनयनां मूर्द्धालकैर्बर्वरां।**
**भिल्ली वेशधरां नमामि शबरीं त्वामेकवीरां पराम्॥**

एकनाथे जगन्नाथे जमदग्निप्रियेऽऽह्वये।
रेणुके त्राहि मां देवि राममातः शिवंकुरु॥
जमदग्निप्रियां राममातरं योगपीठगाम्।
त्रैलोक्यमोहिनीमम्बां एकवीरां परां नुमः॥
एकनाथे जगन्नाथे जमदग्निप्रियेऽऽह्वये।
रेणुकां तां नमोदेवि काममातः नमोऽस्तुते॥

**ॐ ह्रीं क्लों सः हस ऐं ह्रीं सखि प्रें ऐं महाप्रकट-योगिनि एकवीरके ह्रीं जगन्मोहिनीं ह्रीम्।**

**नागलोक भूलोकादि सत्यलोकानां श्रीं श्रीं शीघ्रमार्कषिणीं क्लीं सकलमनोरथार्कषिणीं सर्वसिद्धि कुरु कुरु सौः क्लां रेणुके स्वाहा।**

**इति डामरेश्वरतन्त्रे मालामन्त्रं स्वरूपं नाम चतुःषष्ठितमोऽध्यायः।**

॥ श्री ॥

# रेणुका गीतम्

सुर शिरश्चरच्चरण रेणुका ।
जगदधीश्वरी जयति रेणुका ॥

देवता शिरो देश लालितम् ।
रेणुका पादं दिशतु मे मुदम् ॥

कुण्डलीपुरी मण्डनं महः ।
किमपि भासतां मम सदा हृदि ॥

मस्तकैतवं वस्तु शाश्वतम् ।
अस्ति मे सदा शस्तदं हृदि ॥

आदिनारि ते पादपङ्कजम् ।
स्फुरतु मे मनः सरसिजे सदा ॥

केवलं पदो सेवकोऽस्मि ते ।
वेद्मि नेतरद्वेद सन्नुते ॥

हृदय तेणुनः समुचितोऽणुना ।
परिचयोऽम्बिका पादरेणुना ॥

पाहि मुंच वा पादपङ्कजम् ।
त्रिदश सन्नुते न त्यजामि ते ॥

चरणमम्ब ते यो निषेवते ।
पुनरयं कुचौ धयति किं कृती ॥
अहरहोऽम्ब ते रहसि चिन्तया ।
धन्यतां गतो नान्यदर्थये ॥
स्मरजितो यथा शिरसि जाह्नवी ।
जननि रेणुके मनसि ते कृपा ॥
अम्ब पाहि मां दम्भ तापसि ।
पादपङ्कजयोः आदिकिङ्करम् ॥
पुत्रमात्मनः पुण्यकीर्तने ।
बहुकृपे कुतो मामुपेक्षसे ॥
अम्ब संस्तुते जम्भ वैरिणा ।
पाहिमामिमं मग्नमापदि ॥
तत्ववादिनाः सत्वशालिनी ।
त्वामजे विदुः सत्स्वरूपिणीम् ॥
त्वां प्रचक्षते सदयवीक्षिते ।
वेदि वेदिनो मोदरूपिणीम् ॥
संविदं विदुस्त्वामिदं प्रभुम् ।
परमयोगिनः परमदेवते ॥
जननि कुण्डलीपुर निवासिनि ।
परशुरामवत्पश्य मामिमम् ॥
तनयरोदनं श्रवण शालिनि ।
शृणुसुरार्चिते यदि दया हृदि ॥
याचकः सुतो भजनमीप्सितम् ।
तदपिदुर्लभं किमिदमम्बिके ॥
मास्तु वेतनं छिन्नमस्तके ।
भजनमेव ते याच्यते मया ॥
तरलतारया ज्वलनदीर्घया ।
सानुकम्पया शीतपातया ॥

केवलं दृशां पश्य रेणुके ।
तेन मे शुभं नच तवाशुभम् ।।
किङ्करीभवत्सुर - विलासिनी ।
जयति कुण्डली नगरवासिनी ।।
मधुरमम्ब ते चरणपङ्कजम् ।
तत्र यद्रतैस्त्यज्यतेऽखिलम् ।।
चरणमम्ब ते चरतु मे हृदि ।
इयमनामये प्रार्थना मम ।।
भुजगकङ्कणप्रभृति संस्तुते ।
भुजभुवामरेर्जननि पाहिमाम् ।।
कुण्डलीपुरी मण्डनायिता ।
गणपतिस्तुता जयति रेणुका ।।

।। इति श्री रेणुका गीतम् ।।

# श्रीपरशुराम तन्त्राम्

अथात: सम्प्रवक्ष्यामि राममन्त्रं समाहृतम् ।
आकल्पमेकएवायं जामदग्न्योमहाबल: ।।
दुष्टक्षत्रतमोध्वंसी रेणुकोद्भूतभास्कर: ।।

**ब्रह्मक्षत्राय विद्महे क्षत्रियान्ताय धीमहि ।**
**तन्नो राम:प्रचोदयात् ।।**

भरद्वाजो मुनि: प्रोक्तोगायत्रं छन्द ईरितम् ।
श्रीमान्परशुरामोऽस्य देवता भक्तवत्सल: ।।
अष्टेषु त्र्यक्षिवेदार्णैर्मनो: प्रोक्तं षडङ्गकम् ।।
नेत्रयो: कर्णयोर्नासाद्वये चाधरयुग्मके ।
स्तनयोर्भुजयो: पार्श्वद्वयेऽघ्र्योर्विन्यसेत्पदम् ।।
आधारे हृदये मूर्ध्नि क्रमात् पादान्प्रविन्यसेत् ।
के दृशि श्रोत्रनासायां कपोले हनुवक्रयो: ।।
कण्ठांसबाहुहस्तेषु पार्श्वहृत्पृष्ठकोदरे ।
नाभिकटचोर्गुदे लिङ्गे ऊर्वोर्वा जानुजंघयो: ।।
पादे च विन्यसेद्वर्णान्ततोध्यायेत्त्रिधातनुम् ।
सात्विके श्वेतवर्णं च भस्मोद्धूलितविग्रहम् ।।
किरीटिनं कुण्डलिनं वरंस्वक्षबराभयान् ।
करैर्दधानं तरलं विप्रं क्षत्रवधोद्यतम् ।।
पीताम्बरधरं कामरूपं बाला निरीक्षितम् ।।

ध्यायेच्च तामसं क्षत्रं रुधिराक्तपरश्वधम् ।
आरक्तनेत्रकर्णस्थब्रह्मसूत्रं यमप्रभम् ॥
धनुष्टंकारनिर्घोष संत्रस्तभुवनत्रयम् ।
चतुर्बाहुं मुसलिनं राजसं क्रुद्धमेव च ॥
वैष्णवे तु यजेत्पीठे देवाग्राच्च चतुर्दले ।
जामदग्निं च कालं च रेणुकां काममर्चयेत् ॥
तद्दलेषु षडङ्गानि तद्बाह्येऽष्टदले यजेत् ।
दिक्षु वेदान् विदिक्पत्रेषूपवेदांस्ततो यजेत् ॥
ततश्चाष्टदले पूज्या विद्बुद्धाश्चावतारकाः ।
ब्रह्मास्त्रं वैष्णवास्त्रंच रौद्रं वायव्यमेवच ॥
आग्नेयञ्चैव नागास्त्रं मोहन स्तम्भनं तथा ।
ऐन्द्रपालकमस्त्रंच महापाशुपतं तथा ॥
पूजयेद्दशपत्रेषु द्वादशारे ततोऽर्चयेत् ।
कश्यपं च भरद्वाजं विश्वामित्रं च गौतमम् ॥
वशिष्ठं नारदं चात्रिं पुलस्त्यं पुलहं क्रतुम् ।
याज्ञवल्क्यं भार्गवंच षोडशारे ततोयजेत् ॥
संहिताश्च पुराणानि मीमांसा न्यायमेवच ।
साध्यं पातं जलं शिल्पंवेदाङ्गानिच षट् क्रमात् ॥
सर्वाण्युपपुराणानि चेतिहासपुराणकम् ।
स्मृतीस्तु भूपुराग्रेच दिगीशानायुधानिच ॥
वर्णलक्षं जपेन्मन्त्रं सिताद्यघृतपायसैः ।
हुनेत् ब्राह्मणभोज्यान्तं कृत्वासिद्धोभवेन्मनुः ॥
ब्रह्म कर्मरतोनित्यं गायत्री जपतत्परः ।
स एव जायते सिद्धो नान्यविप्रः कदाचन ॥
गायत्री प्रथमं पादं पूर्वंकृत्वा जपेन्मनुम् ।
लक्षं प्राग्वद्हुनेद्रामं सात्विकं तत्रचिन्तयेत् ॥
सन्तानार्थं विवाहार्थं कृष्यर्थं वर्षणायच ।
विषयार्थं धनार्थंच वाक्सिद्धयर्थमुदाहृतम् ॥

सहस्रमयुतं लक्षं प्रयुतंकोटिमेवच ।
साध्यकृच्छ्रेति कृच्छ्रे च दैवसाध्येत्वसाध्यके ।।
कार्या जपस्य संख्येयं क्रमाद्ज्ञेया दशांशतः ।
होमः सर्वत्र विज्ञेयः प्रत्यवायनिराकृतौ ।।
तावदेवजपेद्विद्वान् गायत्री जपतत्परः ।
मनागपि न कर्त्तव्यो ब्रह्मद्वेषः कदाचन ।।
गायत्री मध्यचरणयुक्तं मन्त्रंजपेद्धुनेत् ।
तिलौदनाज्यं रामंतु राजसंतत्रभावयेत् ।।
देशग्रामपुरादीनां बालानांच गवामपि ।
रक्षणं स्यान्महामारी शीतला शान्तयेतथा ।।
गायत्र्यन्तिमपादेन युक्तंमन्त्रंजपेद्ध्रुवम् ।
होमः सर्षप तैलाक्तैस्तामसं चिन्तयेद् विभुम् ।।
सर्वशत्रु विनाशस्याद्रोगादीनां तथाक्षयः ।
एवं कुर्याद्यमुद्दिश्य तस्यनाशो भवेद्ध्रुवम् ।।
वैसाख शुक्लपक्षे च तृतीयायांतु वार्षिकी ।
भवेदस्य महापूजा तांभक्तः प्रयतश्चरेत् ।।
रामभक्तं द्विजं नत्वा संग्रामे याति चेन्नृपः ।
अवश्यं स रिपून् जित्वा कुशली स्वगृहं व्रजेत् ।।
रामभक्तेन यो दत्तः पुस्तिकेलिखिते मनुः ।
सतु सिध्दिप्रदो ज्ञेयो नास्ति तस्य पुरस्क्रिया ।।
यत्किंचित्पुस्तिकारूढं रामभक्तमुखोद्गतम् ।
यन्त्रमन्त्रोऽथवाविद्यातत्सिद्धं नास्ति संशयः ।।
ज्ञात्वा षोडश संस्कारैः संस्कृतं चार्यवंशजम् ।
कुलद्वयविशुद्धंतु राममन्त्राधिकारिणम् ।।
फिरङ्गा यवनाश्चीनाः खुरासानाश्च म्लेक्षजाः ।
रामभक्तं प्रदृष्ट्वैवतुष्यन्ति प्रणमन्तिच ।।
कृत्वा तु वालुका मूर्ति श्रीरामस्यार्चयेद्वने ।
शान्तं शत्रुमदं कुर्यात् कुसुमानिच वै हुनेत् ।।

राज्ञोऽमुकस्य कटकं जुहोमीतितथा वदेत् ।
सप्ताहार्वाक् तस्यसैन्यं नष्टं तावन्मितं भवेत् ॥
महेन्द्राग्रे च काश्यांच यो जपेन्निर्जने वने ।
वर्षादर्वाक् तस्यरामः प्रत्यक्षो जायते ध्रुवम् ॥
सोमवारे काशिकायां गयायां पितृपक्षके ।
सूषारके पौर्णमास्यां प्रयागे तु मृगे रवौ ॥
गोदावर्यां सिंहगेऽर्के गंगाद्वारे घटस्थिते ।
सूर्यग्रहे कुरुक्षेत्रे रामो गच्छति सर्वदा ॥
आद्यो रामो जामदग्न्यः क्षत्रियाणां कुलान्तकः ।
परश्वधधरोदाता मातृहा मातृजीवकः ॥
समुद्रतीर निलयो महेशपाठिताखिलः ।
गोत्राणकृद्गोप्रदाता विप्रक्षत्रियकर्मकृत् ॥
द्वादशैतानिनामानि त्रिसन्ध्यं यः पठेन्नरः ।
नापमृत्यु न दारिद्रयं न च वंशक्षयो भवेत् ॥
श्रीमत्परशुरामस्य गायत्र्येषा महाद्भुता ।
राज्यकृत् कलिभूपानां सर्वं तन्त्रेषु गोपिता ॥

**॥ इतिश्रीमेरुतन्त्रे परशुराम तन्त्रं सम्पूर्णम् ॥**

# श्री परशुराम सहस्रनाम स्तोत्रम्

॥ श्रीगणेशाय नमः ॥

पुरादाशरथीरामः कृतोद्वाहः सबान्धवः ।
गच्छन्नयोध्यां राजेन्द्रः पितृमातृसुहृद्वृतः ॥
ददर्श यान्तं मार्गेण क्षत्रियान्तकरं विभुम् ।
रामं तं भार्गवं दृष्ट्वाभितस्तुष्टावराघवः ।
रामः श्रीमान्महाविष्णुरितिनाम सहस्रतः ॥
अहं त्वत्तः परंराम विचरामि स्वलीलया ।
इत्युक्तवन्तमभ्यर्च्य प्रणिपत्यकृताञ्जलिः ॥

## राघवउवाच

यन्नामगृहणाज्जन्तुः प्राप्नुयान्नभवापदम् ।
यस्य पादार्चनात्सिद्धिः स्वेप्सिता नौमिभार्गवम् ॥
निःस्पृहो यः सदा देवो भूम्यां वसति माधवः ।
आत्मबोधोदधिं स्वच्छं योगिनं नौमि भार्गवम् ॥
यस्मादेतज्जगत्सर्वं जायते यत्रलीलया ।
स्थितिं प्राप्नोतिदेवेशं जामदग्न्यं नमाम्यहम् ॥
यस्य भ्रूभङ्गमात्रेण ब्रह्माद्याः सकलाः सुराः ।
शतवारं भवन्त्यत्र भवन्ति न भवन्तिच ॥
तप उग्रं चचारादौ यमुद्दिश्य च रेणुका ।
आद्या शक्तिर्महादेवी रामं तं प्रणमाम्यहम् ॥

अस्य श्रीजामदग्न्य सहस्रनाम स्तोत्रमन्त्रस्य श्रीराम ऋषि:। जामदग्न्यः परमात्मा देवता। अनुष्टुप्छन्दः। श्रीमदविनाशिरामप्रीत्यर्थं चतुर्विधपुरुषार्थसिद्धयर्थं जपेविनियोगः।

## अथकरन्यासः

ॐ ह्रां गोविन्दात्मने अङ्गुष्ठाभ्यांनमः।
ॐ ह्रीं महीधरात्मने तर्जनीभ्यां नमः।
ॐ ह्रूं हृषीकेशात्मने मध्यमाभ्यां नमः।
ॐ ह्रैं त्रिविक्रमात्मने अनामिकाभ्यांनमः।
ॐ ह्रौं विष्णवात्मने कनिष्ठिकाभ्यांनमः।
ॐ ह्रः माधवात्मने करतलकरपृष्ठाभ्यांनमः।

## अथहृदयन्यासः

ॐ ह्रां गोविन्दात्मने हृदयायनमः।
ॐ ह्रीं महीधरात्मने शिरसे स्वाहा।
ॐ ह्रूं हृषीकेशात्मने शिखायै वषट्।
ॐ ह्रैं त्रिविक्रमात्मने कवचाय हुम्।
ॐ ह्रौं विष्णवात्मने नेत्रत्रयाय वौषट्।
ॐ ह्रः माधवात्मने अस्त्रायफट्।

## अथध्यानम्

शुद्धजाम्बूनदनिभं ब्रह्मविष्णु शिवात्मकम्।
सर्वाभरण संयुक्तं कृष्णाजिनधरं विभुम्॥
बाणचापौ च परशुमभयं च चतुर्भुजैः।
प्रकोष्ठशोभिरुद्राक्षैर्दधानं भृगुनन्दनम्॥
हेमयज्ञोपवीतंच स्निग्धस्मितमुखाम्बुजम्।
दर्भाञ्चितकरं देवं क्षत्रियक्षय दीक्षितम्॥

श्रीवत्सवक्षसं रामं ध्यायेद्वै ब्रह्मचारिणम् ।
हृत्पुण्डरीकमध्यस्थं सनकाद्यैरभिष्टुतम् ॥
सहस्रमिव सूर्याणामेकीभूयपुर:स्थितम् ।
तपसामिव सन्मूर्ति भृगुवंश तपस्विनम् ॥
चूडाचुम्बित कङ्कपत्रमभितस्तूणीद्वयंपृष्ठतो ।
भस्मस्निग्धपवित्रलाञ्छनवपुर्धत्ते त्वचंरौरवीम् ॥
मौञ्ज्या मेखलया नियन्त्रितमधो वासश्चमाञ्जिष्ठकं ।
पाणौ कार्मुकमक्षसूत्रबलयं दण्ड: परे पैप्पल: ॥
रेणुका हृदयानन्दं भृगुवंश तपस्विनम् ।
क्षत्रियाणामन्तकं पूर्णं जामदग्न्यं नमाम्यहम् ॥
अव्यक्तव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधार मूर्तये ब्रह्मणे नम: ॥
हरि:परशुधारी च रामश्च भृगुनन्दन: ।
एकवीरात्मजो विष्णुर्जामदग्न्य: प्रतापवान् ॥
सह्याद्रिवासी वीरश्च क्षत्रजित्पृथिवीपति: ।
इति द्वादश नामानि भार्गवस्य महात्मन: ॥
यस्त्रिकाले पठेन्नित्यं सर्वत्र विजयी भवेत् ॥
ॐ राम: श्रीमान्महाविष्णुर्भार्गवो जमदग्निज: ।
तत्वरूपी परं ब्रह्म शाश्वत: सर्वशक्तिधृक् ॥
वरेण्यो वरद: सर्वसिद्धिद: कञ्जलोचन: ।
राजेन्द्रश्च सदाचारो जामदग्न्य: परात्पर: ॥
परमार्थैकनिरतो जितामित्रो जनार्दन: ।
ऋषिप्रवरवन्द्यश्च दान्त: शत्रुविनाशन: ॥
सर्वकर्मा पवित्रश्च अदीनो दीनसाधक: ।
अभिवाद्यो महावीरस्तपस्वी नियमप्रिय: ॥
स्वयंभू सर्वरूपश्च सर्वात्मा सर्वदृक्प्रभु: ।
ईशान: सर्वदेवादिर्वरीयान्सर्वगोऽच्युत: ॥

सर्वज्ञः सर्व वेदादि शरण्यः परमेश्वरः ।
ज्ञानभाव्योऽपरिच्छेद्यः शुचिर्वाग्मी प्रतापवान् ॥
जितक्रोधो गुडाकेशो द्युतिमानरिमर्दनः ।
रेणुकातनयः साक्षादजितोऽव्यय एव च ॥
विपुलांसो महोरस्कोऽतीन्द्रो वन्द्यो दयानिधिः ।
अनादिर्भगवानिन्द्रः सर्वलोकारिमर्दनः ॥
सत्यःसत्यव्रतः सत्यसन्धः परमधार्मिकः ।
लोकात्मा लोकक्रुल्लोक वन्द्यः सर्वमयो निधिः ॥
वश्यो दया सुधीर्गोप्ता दक्षः सर्वैकपावनः ।
ब्रह्मण्यो ब्रह्मचारी च ब्रह्म ब्रह्मप्रकाशकः ॥
सुन्दरोऽजिनवासाश्च ब्रह्मसूत्रधरः समः ।
सौम्यो महर्षिः शान्तश्च मौञ्जीभृद्दण्डधारकः ॥
कोदण्डी सर्वजिच्छत्रुदर्पहा पुण्यवर्द्धनः ।
कविर्ब्रह्मर्षिवरदः कमण्डलुधरः कृती ॥
महोदारोऽतुलोभाव्यो जित्षड्वर्गमण्डलः ।
कान्तः पुण्यः सुकीर्तिश्च द्विभुजश्चातिपूरुषः ॥
अकल्मषो दुराराध्यः सर्वावासः कृतागमः ।
वीर्यवान् स्मितभाषीच निवृत्तात्मा पुनर्वसुः ॥
अत्यात्मयोगकुशलः सर्वायुधविशारदः ।
यज्ञस्वरूपी यज्ञेशो यज्ञपालः सनातनः ॥
घनश्यामः स्मृतिः शूरो जरामरणवर्जितः ।
धीरोदात्तः स्वरूपश्च सर्वतीर्थमयो विधिः ॥
वर्णी वर्णाश्रमगुरुः सर्वजित्पुरुषोऽव्ययः ।
शिवशिक्षापरो युक्तः परमात्मा परायणः ॥
प्रमाणरूपो दुर्ज्ञेयः पूर्णः क्रूरः क्रतुर्विभुः ।
आनन्दोऽथ गुणश्रेष्ठोऽनन्तदृष्टिर्गुणाकरः ॥
धनुर्धरो धनुर्वेदः सच्चिदानन्द विग्रहः ।
जनेश्वरोऽविनीतात्मा महाकायस्तपस्विराट् ॥

अखिलाद्यो विश्वकर्मा विनीतात्मा विशारदः ।
अक्षरः केशवः साक्षी मरीचिः सर्वकामदः ॥
कल्याणः प्रकृतिः कल्पः सर्वेशः पुरुषोत्तमः ।
लोकाध्यक्षो गभीरोऽथ सर्वभक्तवरप्रदः ॥
ज्योतिरानन्द रूपश्च वह्निरक्षय आश्रमी ।
भूर्भुवः स्वस्तपोमूर्ती रविः परशुधृक् स्वराट् ॥
वहुश्रुतः सत्यवादी भ्राजिष्णुः सहनो बलः ।
सुखदः कारणं भोक्ता भवबन्धविमोक्षकृत् ॥
संसारतारको नेता सर्वदुःखविमोक्षकृत् ।
देवचूडामणिः कुन्दः सुतपा ब्रह्मवर्द्धनः ॥
नित्योऽनियतकल्याणः शुद्धात्माथ पुरातनः ।
दुःस्वप्न नाशनोनीतिः किरीटीस्कन्ददर्पहृत् ॥
अर्जुनप्राणहा वीरः सहस्रभुजजिद्धरिः ।
क्षत्रियान्तकरः शूरः क्षितिभारकरान्तकृत् ॥
परश्वधधरोधन्वी रेणुकावाक्यतत्परः ।
वीरहा विषमो वीरः पितृवाक्यपरायणः ॥
मातृप्राणद ईशश्च धर्मतत्व विशारदः ।
पितृक्रोधहरः क्रोधः सप्तजिह्वसमप्रभः ॥
स्वभाव भद्रः शत्रुघ्नः स्थाणुः शम्भुश्च केशवः ।
स्थविष्ठः स्थविरो बालः सूक्ष्मो लक्ष्यद्युतिर्महान् ॥
ब्रह्मचारी विनीतात्मा रुद्राक्षवलयः सुधीः ।
अक्षकर्णः सहस्रांशुर्दीप्तः कैवल्यतत्परः ॥
आदित्यः कालरुद्रश्च कालचक्रप्रवर्तकः ।
कवची कुण्डली खड्गी चक्री भीम पराक्रमः ॥
मृत्युंजयो वीरसिंहो जगदात्मा जगद्गुरुः ।
अमृत्युर्जन्मरहितः कालज्ञानी महापटुः ॥
निष्कलङ्को गुणग्रामोऽनिर्विण्णः स्मररूपधृक् ।
अनिर्वेद्यः शतावर्तो दण्डो दमयिता दमः ॥

प्रधानस्तारको धीमांस्तपस्वी भूतसारथिः ।
अहः संवत्सरो योगी संवत्सरकरो द्विजः ॥
शाश्वतो लोकनाथश्च शाखी दण्डी बली जटी ।
कालयोगी महानन्दः तिग्ममन्युः सुवर्चसः ॥
अमर्षणो मर्षणात्मा प्रशान्तात्मा हुताशनः ।
सर्ववासाः सर्वचारी सर्वाधारो विरोचनः ॥
हैमो हेमकरो धर्मो दुर्वासा वासवो यमः ।
उग्रतेजा महातेजा जयो विजयः कालजित् ॥
सहस्रहस्तो विजयो दुर्धरो यज्ञभागभुक् ।
अग्निर्ज्वाली महाज्वालस्त्वतिधूमो हुतो हविः ॥
स्वस्तिदः स्वस्तिभागश्च महान्भर्गपरोयुवा ।
महत्पादो महाहस्तो बृहत्कायो महायशाः ॥
महाकटिर्महाग्रीवो महाबाहुर्महाकरः ।
महानासो महाकम्बुर्महामायः पयोनिधिः ॥
महाबक्षा महौजाश्च महाकेशो महाजनः ।
महामूर्धा महामात्रो महाकर्णो महाहनुः ॥
वृक्षाकारो महाकेतुर्महादंष्ट्रो महामुखः ।
एकवीरो महावीरो वसुदः कालपूजितः ॥
महामेघनिनादी च महाघोषो महाद्युतिः ।
शैवः शैवागमाचारी हैहयानां कुलान्तकः ॥
सर्वगुह्यमयो वज्री बहुलः कर्म साधनः ।
कामी कपिः कामपालः कामदेवः कृतागमः ॥
पञ्चविंशतितत्त्वज्ञः सर्वज्ञः सर्वगोचरः ।
लोकनेता महानादः कालयोगी महाबलः ॥
असंख्येयोऽप्रमेयात्मा वीर्यकृद्वीर्यकोविदः ।
वेदवेद्यो वियद्गोप्ता सर्वामरमुनीश्वरः ॥
सुरेशः शरणं शर्म शब्दब्रह्म सतांगतिः ।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यग्रो व्यग्रनाशनः ॥

शुद्धः पूतः शिवारम्भः सहस्रभुजजिद्धरिः ।
निरवद्यपदोपायः सिद्धिदः सिद्धिसाधनः ॥
चतुर्भुजो महादेवो व्यूढोरस्को जनेश्वरः ।
द्युमणिस्तरणिर्धन्यः कार्तवीर्यबलापहा ॥
लक्ष्मणाग्रजवन्द्यश्च नरो नारायणः प्रियः ।
एकज्योतिर्निरातङ्को मत्स्यरूपी जनप्रियः ॥
सुप्रीतः सुमुखः सूक्ष्मः कूर्मो वाराहकस्तथा ।
व्यापको नारसिंहश्च बलिजिन्मधुसूदनः ॥
अपराजितः सर्वसहो भूषणो भूतवाहनः ।
निवृत्तः संवृतः शिल्पी क्षुद्रहा नित्य सुन्दरः ॥
स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिरनाकुलः ।
प्रशान्तबुद्धिरक्षुद्रः सर्वसत्वावलम्बनः ॥
परमार्थगुरुर्देवो माली संसारसारथिः ।
रसो रसज्ञः सारज्ञः कङ्कणीकृत वासुकिः ॥
कृष्णः कृष्णस्तुतो धीरो मायातीतो विमत्सरः ।
महेश्वरो महीभर्ता शाकल्यः शर्वरीपतिः ॥
तटस्थः कर्णदीक्षादः सुराध्यक्षः सुरारिहा ।
ध्येयोऽग्रधुर्यो धात्रीशो रुचिस्त्रिभुवनेश्वरः ॥
कर्माध्यक्षो निरालम्बः सर्वकाम्यः फलप्रदः ।
अव्यक्तलक्षणो व्यक्तो व्यक्ताव्यक्तो विशांपतिः ॥
त्रिलोकात्मा त्रिलोकेशो जगन्नाथो जनेश्वरः ।
ब्रह्मा हंसश्च रुद्रश्च स्रष्टा हर्ता चतुर्मुखः ॥
निर्मदो निरहंकारो भृगुवंशोद्वहः शुभः ।
वेधा विधाता द्रुहिणो दैवज्ञो देव चेतनः ॥
कैलाश शिखरावासो ब्राह्मणो ब्राह्मणप्रियः ।
अर्थोऽनर्थो महाकोषो ज्ज्येष्ठः श्रेष्ठः शुभाकृतिः ॥
वाणारिर्दमनो यज्वा स्निग्धप्रकृतिरग्नियः ।
वरशीलो वरगुणः सत्यकीर्तिः कृपाकरः ॥

सत्ववान् सात्विको धर्मी बुद्धः कल्की सदाश्रयः ।
दर्पणो दर्पहा दर्पातीतो दृप्तः प्रवर्त्तकः ॥
अमृतांशो अमृतवपुर्वाङमयः सदसन्मयः ।
निधान गर्भो भूशायी कपिलो विश्वभोजनः ॥
प्रभविष्णुग्रसिष्णुश्च चतुर्वर्गफलप्रदः ।
नारसिंहो महाभीमः शरभः कलिपावनः ॥
उग्रः पशुपतिर्भर्गो वैद्यः केशि निषूदनः ।
गोविन्दो गोपतिर्गोप्ता गोपालो गोपवल्लभः ॥
भूतावासो गुहावासः सत्यवासः श्रुतागमः ।
निष्कण्टकः सहस्रार्चिः स्निग्धः प्रकृतिदक्षणः ॥
अकम्पनो गुणग्राही सुप्रीतः प्रीतिवर्द्धनः ।
पद्मगर्भो महागर्भो वज्रगर्भो जलोद्भवः ॥
गभस्तिर्ब्रह्मकृद्ब्रह्म राजराजः स्वयम्भुवः ।
सेनानीरग्रणी साधुर्बलस्तालीकरोमहान् ॥
पृथिवी वायुरापश्च तेजः खं बहुलोचनः ।
सहस्रमूर्द्धा देवेन्द्रः सर्वगुह्यमयो गुरुः ॥
अविनाशी सुखारामस्त्रिलोकी प्राणधारकः ।
निद्रारूपं क्षमा तन्द्रा धृतिर्मेधा स्वधा रविः ॥
होता नेता शिवस्त्राता सप्तजिह्वो विशुद्धपात् ।
स्वाहा हव्यश्च कव्यश्च शतघ्निः शतपाशधृक् ॥
आरोहश्च निरोहश्च तीर्थः तीर्थकरो हरः ।
चराचरात्मा सूक्ष्मस्तु विवस्वान् सवितामृतम् ॥
तुष्टिः पुष्टिः कला काष्ठा मासः पक्षस्तु वासरः ।
ऋतुर्युगादिकालस्तु लिङ्गमात्माथ शाश्वतः ॥
चिरञ्जीवी प्रसन्नात्मा नकुलः प्राणधारणः ।
सर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥
मुक्तिर्लक्ष्मीस्तथा भुक्तिर्विरजाविरजाम्बरः ।
विश्वक्षेत्रं सदाबीजं पुण्य श्रवण कीर्तनः ॥

भिक्षुर्भैक्ष्यं गृहं दारा यजमानश्च याचकः ।
पक्षी च पक्षवाहश्च मनोवेगो निशाचरः ॥
गजहा दैत्यहा नाकः पुरुभूतः पुरुष्टुतः ।
बान्धवो बन्धुवर्गश्च पिता माता सखा सुतः ॥
गायत्री वल्लभः प्रांशुर्मान्धाता भूतभावनः ।
सिद्धार्थकारी सर्वार्थश्छन्दो व्याकरणं श्रुतिः ॥
स्मृतिर्गाथोपशान्तिश्च पुराणः प्राणचञ्चुरः ।
वामनश्च जगत्कालः सुकृतश्च युगाधिपः ॥
उद्गीथः प्रणवो भानुः स्कन्दो वैश्रवणस्तथा ।
अन्तरात्मा हृषीकेशः पद्मनाभः स्तुतिप्रियः ॥
परश्वधायुधः शाखी सिंहगः सिंहवाहनः ।
सिंहनादः सिंहदंष्ट्रो नगो मन्दरधृक्सरः ॥
सह्याचलनिवासी च महेन्द्रकृतसंश्रयः ।
मनोबुद्धिरहंकारः कमलानन्दवर्द्धनः ॥
सनातनतमः स्रग्वी गदी शंखी रथाङ्गभृत् ।
निरीहो निर्विकल्पश्च समर्थोऽनर्थनाशनः ॥
अकायो भक्तकायश्च माधवोऽथ सुरार्चितः ।
योद्धा जेता महावीर्यः शंकरः संततः स्तुतः ॥
विश्वेश्वरो विश्वमूर्तिर्विश्वारामोऽथ विश्वकृत् ।
आजानुबाहुः सुलभः परं ज्योतिः सनातनः ॥
वैकुण्ठः पुण्डरीकाक्षः सर्वभूताशयस्थितः ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥
ऊर्ध्वरेतः ऊर्ध्वलिङ्गः प्रवरो वरदो वरः ।
उन्मत्तवेशः प्रच्छन्नः सप्तद्वीपमहीप्रदः ॥
द्विजधर्मप्रतिष्ठाता वेदात्मा वेदकृच्छ्रयः ।
नित्यः सम्पूर्णकामश्च सर्वज्ञः कुशलागमः ॥
कृपापीयूषजलधिर्धाता कर्त्ता परात्परः ।
अचलो निर्मलस्तृप्तः स्वे महिम्नि प्रतिष्ठितः ॥

असहायः सहायश्च जगद्धेतुरकारणः।
मोक्षदः कीर्तिदश्चैव प्रेरकः कीर्तिनायकः॥
अधर्म शत्रुरक्षोभ्यो वामदेवो महाबलः।
विश्ववीर्यो महावीर्यो श्रीनिवासः सतां गतिः॥
स्वर्णवर्णो वराङ्गश्च सद्योगीच द्विजोत्तमः।
नक्षत्रमाली सुरभिर्विमलो विश्वपावनः॥
वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः।
निदाघस्तपनो मेघो नभो योनिः पराशरः॥
सुखानिलः सुनिष्पन्नः शिशिरो नरवाहनः।
श्रीगर्भः कारणं जप्यो दुर्गः सत्य पराक्रमः॥
आत्मभूरनिरुद्धश्च दत्तात्रेयस्त्रिविक्रमः।
जमदग्निर्बलनिधिः पुलस्त्यः पुलहोऽङ्गिरा॥
वर्णी वर्णगुरुश्चण्डः कल्पवृक्षः कलाधरः।
महेन्द्रो दुर्भरः सिद्धो योगाचार्योवृहस्पतिः॥
निराकारो विशुद्धश्च व्याधिहर्ता निरामयः।
अमोघोऽनिष्टमथनो मुकुन्दो विगतज्वरः॥
स्वयंज्योतिर्गुरुतमः सुप्रसादोऽचलस्तथा।
चन्द्रः सूर्यः शनिः केतुर्भूमिजः सोमनन्दनः॥
भृगुर्महातपा दीर्घतपाः सिद्धोमहागुरुः।
मन्त्री मन्त्रयितामन्त्रो वाग्मी वसुमनाः स्थिरः॥
अद्रिरद्रिशयो शम्भुर्माङ्गल्यो मंगलोवृतः।
जयस्तम्भो जगत्स्तभ्मो बहुरूपो गुणोत्तमः॥
सर्वदेवमयोऽचिन्त्यो देवतात्मा विरूपधृक्।
चतुर्वेदश्चतुर्भावश्चतुरः चतुरप्रियः॥
आद्यन्तशून्यो वैकुण्ठः कर्मसाक्षी फलप्रदः।
दृढायुधः स्कन्दगुरुः परमेष्ठी परायणः॥
कुवेरबन्धुः श्रीकण्ठो देवेशः सूर्यतापनः।
अलुब्धः सर्वशास्त्रज्ञः शास्त्रार्थः परमःपुमान्॥

अग्न्यास: पृथिवीपादो द्विमूर्धा दिक्श्रुति: पर: ।
सोमान्त: करणो ब्रह्ममुख: क्षत्रभुजस्तथा ॥
वैश्योरु: शूद्रपादस्तु नदी सर्वाङ्गसन्धिक: ।
जीमूतकेशोऽब्धि कुक्षिस्तु वैकुण्ठो विष्टरश्रवा: ॥
क्षेत्रज्ञ: तमस: पारी भृगुवंशोद्भवोऽवनि: ।
आत्मयोनी रेणुकेयो महादेवो गुरु: सुर: ॥
एको नैकोऽक्षर: श्रीश: श्रीपतिर्दु:खभेषजम् ।
हृषीकेशोऽथ भगवान् सर्वात्मा विश्व पावन: ॥
विश्वकर्मापवर्गोऽथ लम्बोदरशरीरधृक् ।
अक्रोधोऽद्रोह मोहश्च सर्वतोऽनन्तदृक्तथा ॥
कैवल्यदीप: कैवल्य: साक्षी चेत: विभावसु: ।
एकवीरात्मजो भद्रोऽभद्रहा कैटभार्दन: ॥
विवुधोऽग्रवर: श्रेष्ठ: सर्वदेवोत्तमोत्तम: ।
शिवध्यानरतोदिव्यो नित्ययोगी जितेन्द्रिय: ॥
कर्मसत्यं व्रतंचैव भक्तानुग्रहकृद्धरि: ।
सर्गस्थित्यन्तकृद्रामो विद्याराशिर्गुरूत्तम: ॥
रेणुकाप्राणलिङ्गं च भृगृवंश्य: शतक्रतु: ।
श्रुतिमानेकबन्धुश्च शान्तभद्र: समञ्जस: ॥
अध्यात्मविद्या सारश्च कालभक्षो विश्रृङ्खल: ।
राजेन्द्रो भूपतिर्योगी निर्मायो निर्गुणो गुणी ॥
हिरण्मय: पुराणश्च बलभद्रो जगत्प्रद: ।
वेदवेदाङ्गपारज्ञ: सर्वकर्मामहेश्वर: ॥
एवं नाम्नां सहस्रेण तुष्टाव भृगुवंशजम् ।
श्रीराम: पूजयामास प्रणिपात पुर:सरम् ॥
कोटि सूर्यप्रतीकाशो जटामुकुट भूषित: ।
वेदवेदाङ्गपारज्ञ: स्वधर्म निरत: कवि: ॥
ज्वालामालावृतोधन्वी तुष्ट:प्राह रघूत्तमम् ।
सर्वैश्वर्यं समायुक्तं तुभ्यं प्रादां रघूत्तम ॥

स्वतेजो निर्गतं तस्मात्प्राविशद्राघवंततः ।
यदा विनिर्गतं तेजः ब्रह्माद्याः सकलाः सुराः ॥
चेलुश्च ब्रह्मसदनं चकम्पे च वसुन्धरा ।
ददाह भार्गवं तेजः प्रान्ते वै शतयोजनम् ॥
अधस्तादूर्ध्वतश्चैव हाहेति कृतवान्जनः ।
तदा प्राह महायोगी प्रहसन्निव भार्गवः ॥

### श्री भार्गव उवाच

मा भैष्ट सैनिका रामो मत्तो भिन्नो न नामतः ।
रूपेणाप्रतिमेनापि महदाश्चर्यमद्भुतम् ॥
संस्तुत्य प्रणयाद्रामः कृताञ्जलिपुटोऽब्रवीत् ॥

### श्रीराम उवाच

यद्रूपं भवतो लब्धं सर्वलोक भयंकरम् ।
हितं च जगतां तेन देवानां दुःख शातनम् ॥
जनार्दनकरोम्यद्य विष्णो भृगुकुलोद्वह ।
आशिषो देहि विप्रेन्द्र भार्गवस्तदनन्तरम् ॥
उवाचाशीर्वचो योगी राघवाय महात्मने ।
परं प्रहर्षमापन्नो भगवान राममब्रवीत् ॥

### श्री भार्गव उवाच

धर्मे दृढत्वं युधि शत्रुघातो यशस्तथाद्यं परमं बलंच ।
योगप्रियत्वं मम सन्निकर्षः सदास्तु ते राघव राघवेश ॥
तुष्टोऽथ राघवः प्राह मया प्रोक्तं स्तवं तव ।
यः पठेच्छृणुयाद्वापि श्रावयेद्वाद्विजोत्तमान् ॥
द्विजेष्वकोपं पितृतः प्रसादं,
शतंसमानाउपभोगयुक्तम् ।
कुले प्रसूतिं मातृतः प्रसादं,
समां प्राप्तिं प्राप्नुयाच्चापि दाक्ष्यम् ॥

प्रीतिं चाग्र्यां बान्धवानां निरोगं ।
कुलं प्रसूतैः पौत्रवर्गैः समेतम् ॥
अश्वमेध सहस्रेण फलं भवति तस्य वै ।
घृताद्यैः स्नापयेद्रामं स्थाल्यां वै कलशे स्थितम् ॥
नाम्नां सहस्रेणानेन श्रद्धया भार्गवं हरिम् ।
सोऽपि यज्ञसहस्रस्य फलं भवति वाञ्छितम् ॥
पूज्यो भवति रुद्रस्य मम चापि विशेषतः ।
तस्मान्नाम्नां सहस्रेण पूजयेद्यो जगद्गुरुम् ॥
जपनाम्नां सहस्रं च स याति परमां गतिम् ।
श्रीः कीर्तिर्धीर्धृतिस्तुष्टिः संततिश्च निरामया ॥
अणिमा लघिमाप्राप्तिरैश्वर्याद्याश्च सिद्धयः ।
सर्वभूत सुहृत्वं च लोके वृद्धिः परामतिः ॥
भवेत्प्रातश्च मध्याह्ने सायं च जगतोहरेः ।
नामानिध्यायतो राम सान्निध्यं च हरेर्भवेत् ॥
अयने विषुवे चैव जपन्त्वालिख्य पुस्तकम् ।
दद्याद्वै यो वैष्णवेभ्यो नष्टबन्धो न जायते ॥
न भवेच्चकुले तस्य कश्चिल्लक्ष्मी विवर्जितः ।
वरदो भार्गवस्तस्य लभते च सतां गतिम् ॥

इति श्री अग्निपुराणे दाशरथिरामप्रोक्तं
परशुराम सहस्रनामस्तोत्रं संपूर्णम् ।
श्रीभार्गवार्पणमस्तु ।
श्रीरस्तु ॥

# श्रीभार्गवकवचम्



॥ श्रीगणेशाय नमः ॥

## श्रीनारायण उवाच

**कैलास शिखरे रम्ये शंकरं लोकशंकरम् ।**
**कैवल्यचरणं गौरी पप्रच्छ हितमद्भुतम् ॥**

## पार्वत्युवाच

देवदेव महादेव देवेश वृषभध्वज ।
त्वत्तः श्रुतान्यशेषाणि जामदग्न्यस्यसाम्प्रतम् ॥
हरेरंशावतीर्णस्य मन्त्रयन्त्रादिकान्यलम् ।
न श्रुतंकवचंदेव न चोक्तं भवता मम ॥
वक्तुमर्हसिदेवेश भक्तायै गुह्यमप्युत ।
इति पृष्टः स गिरिशो मन्त्रयन्त्राङ्गतत्ववित् ॥
उवाच प्रहसन्देवीं हिताय जगतामिदम् ।
रहस्यमपि हि ब्रूयुर्लोकैकहितदृष्टयः ॥

## शिव उवाच

शृणुप्रिये प्रियमिदं मम गुह्यतरं परम् ।
धर्मार्थकाममोक्षाणामनायासं सुसिद्धिदम् ॥
एकमौपायिकं मन्ये विष्णु वक्षः स्थलालयाम् ।
श्रियमाकृष्टकामानामिदं कवचमद्भुतम् ॥

एकातपत्रसहितां य इच्छेत्सागराम्बराम् ।
स जामदग्न्यकवचं नित्यमावर्तयेन्नरः ॥
उद्दण्डशस्त्रदोर्दण्ड - प्रचण्डरिपुमण्डलम् ।
कथं जयेयुर्वीरेन्द्राः कवचानावृताङ्गकाः ॥
परप्रयुक्तकृत्यादिदोषा भूतादयोऽपि वा ।
प्रयान्ति भीता रामस्य वर्मणा वीक्ष्य रक्षितम् ॥
किमन्यैः कवचैर्देवि किमन्यैर्मनुभिश्च वा ।
जामदग्न्यः परं यस्य दैवतं भृत्यवत्सलः ॥
कवचस्यास्य गिरिजे ऋष्यादिन्यास कल्पनम् ।
मूलमन्त्रोक्तविधिना कारयेत्साधकोत्तमः ॥

अङ्गिराऋषिः । बृहतीछन्दः ।
श्रीमाञ्जामदग्न्यो देवता ।

**उद्दोर्दण्डचलत्कुठार शिखरस्फारस्फुलिङ्गाङ्कुर-,**
**व्रातामोघ महास्त्रनाशित जगद्विद्वेषि वंशाटवीम् ।**
**वन्दे भार्गवमुग्रकार्मुकधरं शान्तप्रसन्नाननं,**
**वीर श्रीपरिचुम्ब्यमानमहितस्वब्रह्म तेजो निधिम् ॥**

ॐ जामदग्न्यः शिरःपातु पातु मूर्धानमूर्ध्वदृक् ।
ललाटं ललितः पातु भ्रुवौ भृत्यार्तिनाशनः ॥
श्रवसी सुश्रवा मेऽव्यात्कर्णौ कर्णान्तलोचनः ।
नेत्रे गोत्रार्तिहा मेऽव्याल्लोचने भवमोचनः ॥
गण्डे मे खण्डपरशुः कपोलौ पातु शीलवान् ।
नासे सुनासः पायान्मे नासिके दासवत्सलः ॥
रसनां रसरूपोऽव्याद्रसज्ञां रेणुका सुत ।
अधरौ पातु मे नित्यमधरीकृतशात्रवः ॥
वक्त्रं चित्रचरित्रोऽव्याद्दन्तान्दन्तीन्द्रविक्रमः ।
चिबुकं रिपुजित्पातु ग्रीवां श्रीवत्सलाञ्छनः ॥
स्कन्धौ मे स्कन्दविजयी कक्षे मे क्षत्रियान्तकः ।
भुजौ मे सततं पातु सहस्रभुजशासनः ॥

करौ हितकरः पातु पाणी क्षोणीभरापहा ।
अङ्गुलीर्मङ्गलगुणो नखानि मखकृन्मम ।।
वक्षः पातुममाभीक्ष्णं क्षतजाभिषवप्रियः ।
उरः पुरुषवीरो मे पार्श्वौ पातु परश्वधीः ।।
उदरस्थजगत्पायादुदरं मम सर्वदा ।
भयापदोऽव्यान्नाभि मध्यं निध्यातविष्टपः ।।
लिङ्गं शंकरशिष्योऽव्यादुपस्थं निस्तुलप्रभः ।
पायवपानं च मे पायात्सायकासनवान्सदा ।।
त्रिः सप्तकृत्वः कुलहा त्रिकं मेऽवतुसर्वदा ।
परमेष्ठचवतात्पृष्ठं पिठरं दृढविक्रमः ।।
ऊरू मे समःपातु जानू मे जगतांपतिः ।
जङ्घे संघातहन्ताव्यात्प्रपदे विपदान्तकः ।।
पादौ मे पादचार्यव्याच्चरणौ करुणानिधिः ।
पादाङ्गुलीः पापहा मे पायात्पादतले परः ।।
परश्वधधरः पायाद्रामः पादनखानि मे ।
पूर्वाभिभाषी मां पायात्पूर्वस्यां दिशि संततम् ।।
दक्षिणस्यामपिदिशि दक्षयज्ञान्तकप्रियः ।
पश्चिमस्यां सदापायात्पाश्चात्याम्बुधि मर्दनः ।।
वित्तेश रक्षिताशायां पायान्मां सत्यमार्चितः ।
सर्वतः सत्यजित्पायान्ममाङ्गानि भयात्प्रभुः ।।
मनो महेन्द्रनिलयश्चित्तं मे दृप्तनाशनः ।
बुद्धिं सिद्धार्चितः पायादहंतामनहंकृतिः ।।
कर्माणि कार्तवीर्यारिर्हेलां हैहयवंशहा ।
हरत्वमोघदृङमोहं क्रोधं च क्रोधदर्पहा ।।
श्रियं करोतु मे श्रीशः पुष्टिं मे पुष्टि वर्धनः ।
संतानं सततं दद्याद्भृगुसंतानभूरुहः ।।
आयूंषि मे वितनुतादार्यः परमपूरुषः ।
आशां मे पूरयत्वाशु कश्यपार्पित विष्टपः ।।

श्रीमान्परशुरामोमां पातु सर्वात्मना सदा ॥
ॐ इत्येत्कवचं दिव्यमभेद्यं मन्त्रियन्त्रिभिः ।
कथितं देवि ते गुह्यं प्रियेतिपरमाद्भुतम् ॥
न नास्किकाय नादात्रे न चाश्रद्धालवेप्रिये ।
देयान्नाविनीतायै तन्नाभक्ताय कदाचन ॥
नाजापकाय नाज्ञात्रे नासत्य वचसेक्वचित् ।
नामालामन्त्रिणेदेवि प्रदेयं नाप्यमन्त्रिणे ॥
देयं श्रद्धालवे भक्त्या प्रणताय नतात्मने ।
गुणान्विताय शुद्धाय मन्त्रगोप्त्रे च मन्त्रिणे ॥
अवश्यमेतज्जप्तव्यं त्रिसन्ध्यं नियमान्वितैः ।
मन्त्रावसाने मन्त्रज्ञै रचितं मन्त्रसिद्धये ॥
वर्मैतच्च जपेन्मन्त्री जपेद्वा सततं मनुः ।
आसेचितादिव तरोर्फलं नाप्नोति सद्रसम् ॥
जयकामो भूर्जपत्रे रक्तविन्दुभिरुज्वलैः ।
लिखित्वावर्तयेद्रात्रौ कवचं शतसंख्यया ॥
संपूज्य धूप दीपाद्यैर्ध्यात्वा च हृदिभार्गवम् ।
हस्ते बध्वा रणंगत्वा विजयश्रियमाप्नुयात् ॥
एवं संप्रस्थितस्यास्य विद्यावादे रणेऽपिवा ।
वाचस्पतिर्वा शक्रोवा वश्यः स्यात्किमुतापरे ॥
अथवा तिलकं कृत्वा रक्तक्षोदेन भामिनि ।
कवचेनाभिजप्तेन गच्छञ्जयमवाप्नुयात् ॥
श्रीकामस्तु महेन्द्राद्रेर्द्रोणि गत्वामनोहराम् ।
तत्रमण्डलमास्थाय चण्डभानुं विलोकयन् ॥
जपेदिदं महद्वर्म प्रत्यहं शतसंख्यया ।
मण्डलान्ते श्रियं श्रेष्ठां लभते भार्गवाज्ञया ॥
सिद्धयोविविधास्तस्य दिव्यज्योतिर्लतालयः ।
सिध्यन्ति सिद्धवन्द्यस्य कृपयाविस्मयावहाः ॥

भूतप्रेतपिशाचाश्च रोगाश्च विविधाशुभाः ।
दुष्टा नृपास्तस्कराश्च व्याघ्रसिंह गजादयः ।।

श्रीमद्भृगुकुलोत्तमं दशदंशितमद्रिजे ।
दृष्ट्वैव हि पलायन्ते मृत्युं दृष्ट्वैव हि प्रजाः ।।

जामदग्नस्य यो वाञ्छेत्सान्निध्यं योगिदुर्लभम् ।
दारिद्रय दुःखशमनं संसारभयनाशनम् ।।

स महेन्द्रस्य शिखरे स्नात्वोपस्थाय भास्करम् ।
तन्मध्यवर्तिनं शान्तं जटामण्डलमण्डितम् ।।

परश्वधधनुर्दण्ड राजितांसद्वयान्वितम् ।
अक्षसूत्रं सुविभ्राणं दक्षिणेऽङ्गुलिपल्लवे ।।

वामजानुतलन्यस्त -- वामपाणिकुशेशयम् ।
उन्मज्जज्जलजग्रीवमामीलित -- विलोचनम् ।।

सुप्रसन्नमुखाम्भोजं सुस्मितं पल्लवाधरम् ।
सुन्दरं सुन्दरापाङ्गं भोगिभोगभुजद्वयम् ।।

भक्तानुग्राहकं देवं जामदग्न्यं जगत्पतिम् ।
ध्यायन्तमात्मनात्मानं ध्यायेत्प्रणतवत्सलम् ।।

अथ द्वादशभिः पुण्यैर्नामभिः पापहारिभिः ।
जपतामिष्टदैर्भृत्य -- पारिजातं समर्चयेत् ।।

जामदग्न्यो जगन्नेता ब्रह्मण्यो ब्रह्मवत्सलः ।
कार्तवीर्य कुलोच्छेत्ता क्षत्रवंशप्रतापनः ।।

विश्वजिद्दीक्षितोरामः कश्यपाशासुरद्रुमः ।
परश्वधधरः शान्तो महेन्द्रकृत केतनः ।।

एतैर्द्वादशभिर्दिव्यैर्गोप्यैरभ्यर्च्य नामभिः ।
उपतिष्ठेत्पुनर्गुह्यैर्मुख्यैः नामभिरीश्वरम् ।।

क्षिप्रप्रसाद -- जननैश्चतुर्वर्गफलोदयैः ।
हन्त ते सम्प्रवक्ष्यामि तान्यपि प्रणतासि यत् ॥
इमानि गौरि नामानि सुगोप्यानि सतामपि ।
ॐ हंसस्त्रयीमयोधाता योगीन्द्र हृदयालयः ॥
त्रिधामा त्रिगुणातीतस्त्रिमूर्तिस्त्रिजगन्मयः ।
नारायणः परं ब्रह्म परं तत्वं परात्परः ॥
भार्गवो धर्मचरणो भर्गरूपः सतां गतिः ।
इति षोडशभिस्तुत्वा नामभिर्ऋषिपुंगवम् ॥
सर्वाशिषां पतिं देवं सकलाभीष्टदायकैः ।
आत्मानं विन्यसेदङ्गेष्वनेन कवचेन सः ॥
मृगीमुद्रिकयाधीमान् वज्रसारेण सारवित् ।
दशवारं प्रतिदिनं मासमेकं समाचरेत् ॥
स्वप्ने पश्यति देवेशं भार्गवं भृगुनन्दनम् ।
चिन्तितार्थप्रदं सौम्यं चिन्तामणिमिवापरम् ॥
मासत्रयन्तु विन्यस्ते साक्षात्पश्यति जापकः ।
मनसः सम्प्रसादेन लब्ध्वा वरमनुत्तमम् ॥
अणिमादि गुणैर्युक्तो ब्रह्मलोकमवाप्नुयात् ।
अथवा योगसिद्धि यो धातु सिद्धि च वाञ्छति ॥
कुरुक्षेत्रे महेन्द्रे वा जपेदयुतमात्मवान् ।
सर्वाश्चौषधयस्तस्य खेचरत्वादि सिद्धिदाः ॥
रससिद्धिप्रदाश्चापि सिद्धचन्त्यस्य न संशयः ।
महेन्द्राद्रिरिवक्षेत्रं सिद्धिदं नास्तिभूतले ॥
जामदग्न्यइवान्योऽस्ति न देवो भृत्यवत्सलः ।
प्रस्फुरद्गुणसौवर्णराशीनां जन्मभूः परः ॥

तथेदमिव वर्मान्यद्धर्मादिफलदं न हि ।
कवचेऽस्मिन्सकृज्जप्ते मन्त्रावृत्तिसहस्रजम् ॥
फलमाप्नोत्यविकलं तस्मान्नित्यं जपेन्नरः ।
अमन्त्री वापि मन्त्रीवा भार्गवे भक्तिमान्नरः ॥
जपेन्नित्यमिदं वर्म मन्त्रसिद्धिमवाप्नुयात् ।
सारस्वतमिदं देवि कवचं वाक्प्रदं नृणाम् ॥
मूकोऽपि वाग्मी भवति जपन्नेतद्गुरुर्यथा ।
नित्यं परश्वधभृतः कवचस्यास्य धारणात् ॥
सभासुवदतां श्रेष्ठो राज्ञां भवति च प्रियः ।
वैदिकं तान्त्रिकं चैघ मान्त्रिकं ज्ञानमुत्तमम् ॥
कवचस्यास्य जापी तु ब्रह्मज्ञानञ्चविन्दति ।
इत्येदुक्तं कवचं मया हैहयविद्विषः ॥
गोपनीयमिदंदेवि ममात्मासिमणिर्यथा ।
धन्यं यशस्यमायुष्यं श्रीकरं पुष्टिवर्द्धनम् ॥
जपतां कवचं नित्यं सर्व सौभाग्य पूरितम् ॥

इति श्री विष्णुयामले उपरिभागे जामदग्न्य
दिव्याञ्जनकल्पे त्रयस्त्रिंशत्पटलः ।
॥ श्रीभार्गवार्पणमस्तु ॥



# श्रीरेणुकाजी की आरती

जयदेवि जयदेवि जय श्रीरेणुके,
विधिमुख विबुधाराधित सेवितरेणुके ।धृत.।

विस्मृतवेदब्रह्माध्यात्वाऽजमीशं,
नत्वाविविधैःस्तोत्रैस्तुष्टावपरेशम् ।
तत्कथितत्वन्महिमानं ब्रह्म सुरेशं,
स्मारयसित्वां वन्देकुरु करुणालयेशं ।।१।।

गुरुबोधित कृतवीर्यजतपसा दत्तस्स्यात्,
सन्तुष्टोऽपि च राज्ञे चेप्सित वरदःस्यात् ।
पित्रर्थं रामस्तुत दत्तस्याऽस्याऽऽस्यात्,
स्तुतरूपे रक्षयमां बहुविधजन्मभयात् ।।२।।

विधिहर्योश्च ममैतत्पूज्यत्वं प्राप्तं,
यत्पूजनतः शम्भुश्चेत्यवदत् स्वसुतं ।
एनं त्वन्महिमानं के जानन्ति कथं,
कृपया ज्ञानं बोधय निजपदरतभवतम् ।।३।।

---

# आरती श्री रेणुकादेवी

जय जय रेणुकईश्वरि जमदग्नेर्दयिते ।
मयि तेजस्विनि करुणांशो भूयाद्दयिते ॥धृ.॥

शंकर रूपस्य मुनेर्यासाध्वी कान्ता ।
गौरी साक्षाज्जाता रेणोर्यादुहिता ॥
पातिव्रत्यप्रथिता रामस्य च माता ।
माता जगतां नोऽव्यात् त्रिभुवन विख्याता॥१॥

भूभारभूतदुष्टक्षत्रियकुलनाशे,
कृत्याऽभूदद्या हेतुर्विश्वोद्भवनाशे ।
नीराजयामि तां त्वां पूरित सुजनाशे ।
तारय मृत्युमुखान्मां शिक्षितकीनाशे ॥२॥

दत्तात्रेयंकृत्वाऽऽचार्यं सह्यतटे ।
पत्यनुगमनं चक्रे माहुरपुरनिकटे ॥
याऽद्यापि तत्र माता जागर्ति प्रकटे ।
तद्रूपेऽस्तु सदा मे चित्तं सन्निकटे ॥३॥

जय जय रेणुकईश्वरि जमदग्नेर्दयिते ।
मायितेजस्विनि करुणांशो भूयाद्दयिते ॥४॥

# श्री रेणुकाजी की आरती

जय देवि जगदम्ब सच्चित्सुखमूर्ते ।
आरति पदकमले ते विमलेऽखिलहृत्स्थे ॥धृ.॥

मूलाधारे वेदाधारे त्वां वन्दे ।
देवेडित सत्सेवित पदपद्मे सुखदे ॥
भवत मनोरथ पूर्णे सत्कृतिपूर्णमुदे ।
मुदमर्पय मयिमातर्माधीशे वरदे ॥१॥

सृष्टिस्थितिलयकारिणि दानवरिपुवन्दित सत्री ।
सप्त त्रिसप्त फलदे वेदविदां कर्त्री ॥२॥

अम्ब श्री रेणुके मातः श्री काले ।
दुर्गे दुर्गम संवित्सुखदे भव विमले ॥
कमलाक्षि कमलोद्भवमातर्ज्ञान बले ।
अबले निधेहि मयि ते बलमीश्वरि सुबले ॥३॥

श्रीलक्ष्मीः श्रीगौरि वागीश्वरि मातः ।
तारय मां भवभीतं भीत जगत्पातः ॥
भव हरि विधिविनुते निर्गुण गुणचेतः ।
विद्याविद्येरूपे दर्शय मे मातः ॥४॥

—

## श्री १००८ श्री स्वामी जी कृत अन्य रचनायें

| | | | |
|---|---|---|---|
| ☐ | Vaidik Upadesh English | | 15–0 |
| ☐ | Chida Vilasa (English) | 2 /–Bound | 5–0 |
| १. | श्री बगलामुखी रहस्यम् | | १०–० |
| २. | पञ्चोपनिषद् (प्रकाश भाष्य) | | २–२ |
| ३. | प्रश्नोपनिषद् (प्रकाश भाष्य) | | १–० |
| ४. | सौन्दर्य लहरी (डिण्डिम भाष्य) | | ७–० |
| ५. | शिव सूत्रं भक्ति सूत्रञ्च | | ०–५ |
| ६. | नारदीय शिक्षा (संस्कृत टीका) | | १–५ |
| ७. | घेरण्ड संहिता (भाषानुवाद सहित) | | ४–० |
| ८. | प्रत्यभिज्ञा हृदयम् (भाषानुवाद सहित) | | १–५ |
| ९. | ईश्वर-गीता (भाषानुवाद सहित) | | १–५ |
| १०. | वैदिक उपदेश (हिन्दी) | | ५–० |
| ११. | पुरश्चरण पद्धति | | २–० |
| १२. | अथर्ववेदाङ्ग ज्योतिष (भाषानुवाद सहित) | | १–० |
| १३. | वेदान्त प्रवोध (सानुवाद) | | २–० |
| १४. | सौन्दर्य-लहरी (पद्यानुवाद सहित) | | १–० |
| १५. | लेख-संग्रह | | ४–० |
| १६. | सिद्धान्त-रहस्य | | २–० |
| १७. | त्रिपुर-महिम्न स्तोत्र (भाषानुवाद) | | ३–० |
| १८. | तान्त्रिक पञ्चाङ्ग | | ४–० |
| १९. | पंञ्चस्तवी | | ०–५ |
| २०. | महात्रिपुर सुन्दरी पूजा पद्धति | | ३–० |
| २१. | श्री चिद्विलास (श्री विद्या रहस्य) | | १–० |
| २२. | श्री पुरश्चरण | | १–० |
| २३. | सप्तविंशति रहस्यम् (गुरुमण्डल-आम्नायक्रम:) | | ७– |
| २४. | स्वरोदयविज्ञान | | २– |

## श्री पीताम्बरा पीठ संस्कृत परिषद

दतिया (म. प्र.)